२८२ क्तव्यं तयोज्ञानस्य कारणं स्वयमेव भगवान्यस्मात्जानीते तज्जयो धन पितुर्मुखात्भृगुः श्रुत्वा
२९६ ब्रह्मणो लक्षणं हितत् उपायं तु स्वयं ज्ञानस्य चिंतनकेनच तपः स्वधर्मवर्त्तित्वं कृतवानमुनि
सत्तमः सुहृदेमनसिपित्रोक्तं पर्य्यालोच्य महामुनिः अन्नं स्थूलमिदं देहमध्यात्मादि विभाग वि
त आत्मनः प्रथमं कोशं ब्रह्मलक्षणसंयुतं विज्ञाप दोषहृष्ट्याथ पुनः पितरमाव्रजत् देहेभ्यो
जायते विस्पष्टं देहैरेवात्र जीवति स्थितं देहेषु यात्यन्ते तानेवान्न समवायः ययपेवं तथाप्येते स्व
यं देहा विनश्वराः परिच्छिन्नाश्च केनस्युर्ब्रह्मकारणवर्जिते महाभूतात्मकोयं विराजोपि स्य
वीयसः सोपिदेहः परिच्छिन्नो जातश्चैवान्यदेहवत् एवं दोषं विलोक्यास्य प्रष्टुकामः सकारणं
आगत्य च यथा सर्वं प्रश्नमकृतवान् श्रुत्वा वरुणस्तत्परं त्वेतदुक्तवान् ब्रह्मवित्तमः त्वया हृष्टः
उपायोपः स्वचिंतस्व समयानया स एव ब्रह्मविज्ञाने मुख्यो नान्योस्ति कश्चन तपसा ब्रह्म तेनत्वं ज
गतो वृद्धिकारणं तयो ब्रह्मेति तेनैत्यं वदंति ब्रह्मवादिनः एवमुक्ते यथा सर्वं तमवालप्स्यात्म
वान् विज्ञाय कारणं भूयः पितरं गतवान्भृगुः एवं त्रिवारं गतवान्पितरं दोषदर्शकः पितापि
तपसेत्यादि त्रिवारमपि सोवदत् क्रियानामयचरूपं चपाक्रिरूपेणाहृष्टवान्कारणं क्रमतस्तत्र

दोषानेतानलोकयत् सप्राणोदेवजगतोजातोदेहस्यत्रिविधः प्राणोनाम्नादनान्तर्हतस्तिष्ठतेयनसं
शयः प्राणनिर्गमनाद्देहेविनाशंचसगच्छति यद्यप्येवंतयाप्येषजडः प्राणः कथंभवेत कार
णंहिसमाहदृष्टाजडताप्राणदेहयोः ततः प्राणस्यकिंचित्स्यातकारणंचेतनेसदा चेतनंहि
मनोलोकेप्रसिद्धंतस्यकारणं प्राणेयथापुरादोषंदृष्टवानन्वनिसत्तमः मनस्यपितथैवा
यमिदंदोषमलोकयत् इदंसंशयरूपंस्यात्तनमनःकारणंविना अकारणोयतोलोकेसंशयो
नैवजायते संशयस्यसदैवायंनिश्चयोबुद्धिनामकः कारणंनविनाबुद्धिंसंशयोजायतेक्वचित
निश्चित्योर्ध्वपुरावस्तुसंशयस्यादनंतरं ततोबुद्धिर्हिमनसः कारणंनापरंक्वचित् ब्रह्मावयमुनिः
नोहिनावमंदोषमलोकयत् कादाचित्कंयमखिलावस्थबुद्धिः कथंभवेत देहेयतः परिच्छि
न्नातस्मादेषाप्रजायते बुद्धिःसुखेसमुत्पन्नेहिउपजायतीधीमतांसदा कारणान्तरतोदुःखमुपेत्य
चाधिगच्छति इच्छयाजायतेबुद्धिरिच्छाचसुखगोचरे उपेत्यनिखिलेचाप्रदुःखेवादुःखसाधने
जानीयांप्रायशोयोवापिनैवमिच्छाप्रजायते ततः सर्वेप्रवृत्तेयमिच्छादुःखादिकेसदा अनुपादेयरू
पेणागोचरीकृतेन्तरां ततः सुखैकविषयाइच्छाबुद्धेस्तुकारणं बुद्धिश्चततरावेयंसुखएवप्र
जायते इच्छावत्वानुपादेयेजानातद्धेतुकानसा सुखंचजायमानेयत्प्रियमोदप्रमोदकं अविद्या

आ.पु.	ह्मतिरूपं तदन्यकारणं भवेत् कारणेन विनानंदो भवेन्न ब्रह्मरूपभाक् तारतम्यविहीनस्ववृद्धि
२८३ हेतुर्हि सस्मृतः इति विचार्य मतिमान् भृगुर्ब्रह्मविदांवरः आत्मरूपोयमानंदो ब्रह्मेति प्रत्यपद्य
283 त आनंदादेव भूतानि जायंते निखिलान्यपि स्त्रीपुंसयोः संभोगजानां जन्मविवर्जितात्
विघ्न आनंदेनैव जीवंति जातानि निखिलान्यपि निद्राहारविहारांगरागस्त्रीविषयादिना आनं
देन हृदयाकाशे माज्ञेन तादात्म्यरूपतः प्रयांति देहतस्तस्मिन्सर्वतोभिविशंति च निखिलान्यपि
भूतानि स्थावराणि चराणि च निर्विघ्नानि चेदानंदे ब्रह्मे पुनः पुनर्भवेत् शरीरग्रहणं तेषामकृ वाव्र
ह्लंभवात् समाविवस्तो यस्मात् आनंदे हृदये स्थिते प्रजेति सर्वभूतानि साविघ्नान्येव सर्वदा स्वभा
ततः पुनर्देहग्रहणं च प्रकुर्वते जगज्जन्मस्थितिध्वंसा एवमानंदतः सदा यतो भवंति तेनायमानंदो
ब्रह्मशब्दभाक् एवं मननतः सर्वं भृगुरात्मावबोधनं प्राप्तं स्मादिदं सर्वं करणीयं मनुष्याणां से ल
षा विद्या पुरा लब्धा भृगुणा वरुणेन च प्रोक्तास्ति परमे व्योम्नि हृद्यानंदस्वरूपिणि अन्योपि भृगुव
हृदयः पुमान् सोत्र सर्वदा प्रतितिष्ठति सर्वात्मभूतश्चाकृतिवर्जितः अन्नादिकोशविज्ञानादन्ना
द्यामिर्यथा फले आनंदज्ञानतस्तद्वदानंदात्मिः फलं भवेत् क्रमात्कोशानतिक्रम्य पंचाद्यानंदबोध
तः गायत्र्यां स्तद्द्वंसामाहाव हेत्यादिके वृद्ध अहो अहो हृदे चित्रमाश्चर्यमिह वर्तते अमादस्मृतये २८३

वान्नमेक एवास्यहं यतः स्मृत्युपत्तथैवाहमन्त्रदानविवर्जिते अन्नादमग्निमनुजे सर्वदासोदरम्भरः
मेत्रणामपिकर्त्ता हं इत्थावामर्वविज्ञमः कर्म्मणाफलरूपेणजातस्त्वाहं सुखात्मकः देवेष्व
प्यापि सर्वाहि जातः सच विराडपि आनंदस्यामृतस्याहं मध्येनाभिरिवास्थितः संसारचक्रेऽखि
खिलेमपि यस्मिन् समर्पिते धर्मार्थकाममोक्षाख्ये मामन्नादिस्वरूपतः योददातिपुमान्
मोसस्यात्मानमपि चावति अथियः कृपणादीनमन्त्रदानविवर्जिते मृत्युः सन्निगिरवलवि
श्वेनित्यं देहेंद्रियत्त्वयात् तिरस्करोति पुरुषः स्वर्गेवन्मर्त्येसंस्थितः आनंदात्मास्वयंज्यो
तिः सर्वधर्म्मविवर्जितः एवंस्वान्नभवंविद्वान् प्रकटीकुरुतेसदा लोकानुग्रहकामः सन्
कृतिवद्दीनवत्सलः एतदर्थं स्यातस्यासौ साम्नोगानच्छलेनहि विद्वद्भागीयतेयद्धि ब्रह्मनः
त्वेमयेरिते सावधानमनोभूत्वा म्रेणनारायणोस्थिते आनंदात्मास्वयंज्योतिरविद्यायाः परः
पुमान् संसारसागरेगाधेह्यविद्याजलपूरिते यस्मिंस्तिष्ठतिसंते भुवनानिचतुर्दश अनेकभु त
वनस्यास्य मध्येगगनसन्निभः स्वर्गस्यापितथैवायमपरिच्छिन्नमहेश्वरः गगनादेरस्वदेहो म
महीयान्सर्वगोयतः वर्ततेयश्चस्वलेकेनस्वप्रभेणात्मतेजसा ज्योतींषिचन्द्रसूर्यादीनिन्दुपिदे
वादिरूपतः स्थितानिप्राणिनांदेवः प्रविष्टोगगनोयमः सम्यगात्मतयासृष्ट्वेरन्सृष्टिविधा

पकः प्रजापतिरयं देवो विराड्रूपेण तथेश्वरः स्थावराणां चराणां च ह्यधिदैवादिभेदितो चरति
प्राणिनां गर्भमौनं हृदयमध्याने यस्मिन्समस्त विरूढं च जगदेतत्तु चराचरं उत्पन्नो च स्थितो
न हृत्प्रलये च महेश्वरे अधितिष्ठंति यस्मिंश्च विश्वेदेवाः सवासवाः भूतभव्यभवच्चैतत्तु वि
श्वमाहुस्तदेव हि आनंदात्मस्वरूपं यदिंद्रियगणविवर्जितं आत्मन्याकाशरूपेस्मिन्स्वमहि
म्न्येव सर्वदा येनाप्तं तेन भस्त्वहं तत्स्वगोभिः सिश्वविस्तृता आदित्यो येन संदीप्तः स्वप्रभेणात्म
तेजसा तपत्यविरतं सर्वलोकमंडलमध्यगः संसारसागरे सूत्रं भूतमंतः स देवयं जगत्सदा
त्मना निःस्पंदयं तिकवयोजनाः तेनवायाययानहृत्तवर्णयंतिमहेश्वरं जगत्येकां समाप्त
मवाप्नंतस्तगोचरे यस्मिन्नव्यक्तरूपेस्मिन्नुत्पन्ने जगदीश्वरे कालत्रयेवतिष्ठंते प्रजाः स
र्वाः स्थावराचराः यस्माज्जातो जगद्योनिर्ब्रह्मा लोकपितामहः अप्रधानेर्महाभूतैः ससर्जनि
खिलाः प्रजाः भूमौ ब्रह्माडरूपायां वीरुधौषधिरूपतः पुरुषांश्च पश्यंस्तद्वत्त यो विशत्य
त्र सर्वदा चराचराणि भूतानि तथा नानाविधात्मना अतः परं न किंचित्स्यात्तत्त्वमेव ब्रह्मां
म्न्नरूपतः अणोरणीयाएतस्मात्महीयो महतोपि च परात्परमिदं ब्रह्म ह्येवमव्यक्तरूपकं
अनंतं भेदश्रून्यत्वात्पुराणं विश्वरूपभूत् परस्तात्तमसो मायातत्कार्याच्च स देवयः व्याप्य

रोमानसत्तस्माच्छास्त्रीयः कायिकोपिवा अजस्तस्याभिधोयोयं फलमयच्छति देहिनां कवीनांसत्तम
तं च ब्रह्मणः पद्मविपश्यति ते इष्टः सर्जं च तस्माद् बहुधा विश्वरूपकं जातं च जायमानं विश्वयस्मिन्प्रति
ष्ठितं नाभिं संसारचक्रस्य ब्रह्मविद्भिर्यदीरितं अग्निस्तदेवतद्वायुस्तत्सूर्यस्तच्च चंद्रमाः तदेवदीप
मस्तं तदापः स प्रजापतिः निमेषाज्जनिरे तस्माद्ब्रह्मणः सर्वरूपिणः स्वभावात्पुरुषात्सर्वेह्या
धिकेन सहस्तथा कलाकाष्ठामुहूर्ताश्च सहोरात्राश्च सर्वशः अर्द्धमासास्तथामासा ऋतुभिः
सहवत्सराः आपस्तथा त्रिलोकी च सूक्ष्मास्सण्डण्डहेयुमान नानाभौमस्वरूपतन्मयोनिः स्वर ग॥६
रूपके नैवमर्हेदनतिर्यकवनमध्येपि च कश्चन पर्व्यप्रहीत्रनस्येष्टो कोपि तस्य महात्मनः
महर्षयोत्रनामस्माद्दृश्यात्मस्वरूपिणः चक्षुषा कोपि नात्मानं पश्यत्यत्र कदाचन हीनो रू
पादिभिर्यस्मान्नेन्द्रियैश्च न गम्यते हृदयस्थेन बोधेन नियतात्मनसोपि च गम्योपविद्रात्मा
नेतेभवंत्यमतानापि अयमेव पुरा देवो जातो ब्रह्मगोलके पृथिवीरस्तत्रापि लोकेस्मिन्
समवर्तिन ब्रह्मणः सततो नित्यात्परस्मात् विक्रमिणः अधिकः सर्वजगतः शरीरः प्रथ
मो हि पः त्वष्टात्र जगतो धाता तस्य रूपं विनिर्ममे विश्वरूपं पुमानेवित्य निस्य स्वात्मबोधनात् स्व
भावसिद्धरूपं तद् येयत्पुरुषस्य हि अभ्युदये न मगणामस्मात्पुरुषजन्मनः वेदाहमेनं पुरुषं महान्तं

श्री: पु: २८५ प 285

सूर्यवर्चसे परस्तात्तमसोज्योतिरानंदात्मस्वयंप्रभं ज्ञानचैवंतमात्मानमहंब्रह्मेति निश्चितं अस्मिन्देहे
स्थितोभूत्वाब्रह्मसत्त्वब्रह्मयातिसः ब्रह्मप्राप्त्यैनमार्गोन्योविद्यतेब्रह्मबोधनात् अयंप्रजापतिर्भूत्वाच
रत्यंतःशरीरिणां गर्भेशिष्यर्य्यामात्सर्वबहुधात्रविजायते अजायमानस्तस्यास्यधीराजानंतिकार
णं मरीचीनांहिसूर्यादेःयद्विविशंतिवेधसः आनंदात्मस्वरूपंयत्कारणंतन्नचापरं वह्निवागा
दिदेवार्थंयस्त्रानपतिसर्वदा पुरोहितस्त्वदेवानांमभ्ययस्त्वबृहस्पति देवेभ्यस्त्वपुराजातोनमस्त
स्मैमहात्मने तेजसेब्रह्मणेस्तुहृस्वप्रकाशस्वरूपिणे आनंदात्मस्वरूपायमसाकुर्वन्तवर्णिनः एव
मेषामिदंज्ञातंवहुधायतसमीरितं भविष्यतिस्तुणायप्रेक्षयात्तृहृचेतसां दीप्तिमंतंमहात्मा
नेब्रह्मपुत्रंनमस्यये प्रकटंकृतवंतस्ते देवावह्निपुरोगमाः ब्रह्मानंदात्मरूपंतन्नमस्यप्रकटीकृ
तं पुरोकालेब्रुवन्देवास्तेनदत्तंवरंप्रति आनंदात्मस्वरूपायभवतेजगदात्मने योनमस्यतितं
स्यत्वंप्रकटोभवसर्वदा इत्युक्तेतेनदत्तःसवरोब्रह्मस्वरूपिणा नमस्कारंतदावात्माप्रत्यक्षो
वप्रजायते यएवंदेवतारूपंसंनमस्कारंप्रतिद्विजः विद्यात्तस्यवशेदेवाभवंतिसकलाअपि तस्
मिंचेमांप्रकुर्वीतस्वात्मज्ञानप्रसिद्धये कुर्वाणोत्रनमस्कारंब्रह्मणेपरमेष्ठिने श्रीश्चलक्ष्मीश्चते
पत्न्यौपार्श्वेरात्रिस्तथाहिवा नक्षत्राणिचतेरूपमाजनमाश्विजमारको इष्टमेकुरुदेवशासने

सर्वेस्वयंप्रभ आनंदात्मानमात्मस्थप्रकटाकृतंनमः हिरण्यगर्भोभगवानग्रेयःसमवर्तत भू
तस्यपतिरेकस्यजातश्चासीन्महेश्वरः लोकांधृतवानादौमहात्माभोगयागरहे तस्मैदेवा
त्रे यद्विषास्ववर्णाश्रमजेनाहि परिचर्यांवयंकुर्मएकस्मैज्ञानहूनवे प्राणतोजगतोयस्य
व्यापारमपिकुर्वतः इंद्रियैर्ज्ञानकर्माख्यैराज्ञाभूत्महिमान्वितः शून्यमाश्चर्यरूपःसन्पश्य
हेद्विचतुष्पदा आत्मानंयश्चजंतूनांददातिस्वात्मबोधतः बलंचवपुषिस्थित्वायंचवि
श्वउपासते यस्यविषाइमेदेवाःमानाश्चपतत्त्राशिषः छायावयस्यवर्तते मोहमृत्युश्चविं
करोहिमवन्तमख्यायस्यगिरयोमहिमेरिताः हिमवत्प्रभृतिभ्योवागरीयान्महिमाविभोः
ता यौलिः महितायस्यसमुद्राभूमिसंश्रयाः महागिरितटाक्रीडानद्यकास्तशिषारिव दि
शश्चप्रदिशास्तद्वत्यस्यबाहुःप्रकीर्तितः रक्षणेनचयस्येमेविधृतेनिष्ठतःसदा शोभते
येमदात्मस्थेसेद्यैतेब्रह्मवित्तमः मनसास्वात्मनोरूपेसर्वधर्मविवर्जिते आधिकेनचयत्राय
मुदितोभगवान्रविः विविधंयातिसततंदिवारात्रौचभीतःततः उपायेनचभात्येषात्तबुध
मेरतासदा यौरत्नेंद्रादिरूपेणपृथिवीचातिनिश्चला दृढाजलेस्थितानित्यंननिमज्जति
नौरिव स्वर्गलोकस्तथाकाशेयेनस्तभात्मनाधृतो ब्रह्मलोकश्चपततिनैषाश्रयविवर्जितः

आपु· योऽनिरुद्धोरजोजुष्टोभगवान्विषयात्मकः नित्यंदेववधूवक्त्रचंद्रस्यनयनोत्पलः मानहीनश्चसततंदेव।
२८६ प्रासादरूपभाक् भूतपंचकगर्भिण्योमहत्योलोकसंश्रयाः आयोविद्यात्मिकादेवंयमाहुर्विश्वरूपिणं
समष्टिमिवलौकिक्याद्वैतकपालरूपिणं दधानाआत्मनोगर्भेजननमप्यःसमंततः लौकिकंवैदिकंतद्व
286 दग्निंसर्वार्थसाधकं अग्निवागादिदेवानामम्भःप्राणोप्यजायत ताभिर्विनाततोनायंप्राणस्तिष्ठत्य
हर्निशं एकएवपुमान्यस्यमहिम्नांतांव्यलोकयत् स्वेनसर्वगतेनैवस्वप्रभेणाजितेजसा सर्वा
त्मकस्ययोदेवोदेवानामधिदैवतं हिरण्यगर्भंतमहंमुमुक्षुः शरणंगतः कुर्वाणःसततंतस्मैएकस्मै
हविरादिना सपर्यांपरमेशायब्रह्मणोऽव्यक्तजन्मने नमोस्तुतेजसेतस्मैयस्मैकस्मैचिदात्मने एक
स्मैकापिसंस्थायसर्वगस्यापिसर्वदा महंममतत्त्वेब्रह्मज्ञानंयच्छतुकश्चन सर्वात्मकोविहीनश्च
धर्मैः सर्वैश्चरंततः एवंहिस्तुवतोनित्यंतथैवंचनमस्यतः मुमुक्षोरात्मविज्ञानमिदमेवप्रयच्छ।
वस्तु ति एषदेवःस्वयंज्योतिः प्रदिशोपिदिशास्तथा सर्वाःसर्वेह्यियोजातोजगतःस्वच्छरूपभाक् ब्रह्मां
डगोलकस्यापिगर्भएषव्यवस्थितः वधूनांचयथैवैषचतुर्विधशरीरभाक् जातोजनिष्यमाण
श्चसैवैषपरिजायते अंतर्मुखोपमात्मानमीक्षतेविश्वतोमुखं सएषप्रतिभात्यात्मातस्यास्मिन्वि
श्वतोमुखः विश्वतश्चक्षुरादिर्योविश्वतोवदनस्तथा विश्वतःकरपादादिः सर्वभूतोयतःपुमान्

वाङ्भ्यामेवपापाख्यपुण्याभ्यांभ्रमणंचक सहिताभ्यामिदंविश्वंचक्रवित्थंपारीभ्रमत सृष्टिस्थितिवि
नाशेनसंयोजयतिनित्यशः देवोयंजनयत्द्यावापृथिव्यावेकएवहि वेननामपुराकश्चित्गंध
र्वीः स्फुट्मानसः उक्तस्तेननमस्यायेदंह्यत्रब्रह्मसनातनं प्रोवाचानुभवंस्वस्यलोकानुग्रहकारकः
यस्मिन्जगदिदंनित्यमेकस्मिन्नवतिष्ठते नानालोकादिसंयुक्तंसदाकालत्रयेपिहि यतउत्पद्यतेय
त्रलीयतेचाखिलंतथा ओतप्रोतश्चलोकाख्यपटेसौत्रत्वरूपभाक् जीवरूपश्चयोदेवः स्थिरजं
गमरूपिणि एतेसर्वशरीरेषुसंततंबुद्धिषुसंस्थितं आनंदात्मानमद्वैतंमरणादिविवर्जितं यदाति
त्रीणियस्यसूत्रात्मनःपरमेष्ठिनः बुद्धिस्थानिमनुष्याणांसर्वदैवचतुष्पदः यस्तस्मादत्रयंवेदम
स्यप्रकाशंगतंहृदये सदनेतसैदेवास्यसवितृब्रह्मरूपिणः सत्तोवैधुस्तथैवषजननीचात्मरूपवान
विधाताचसएवस्यात्ततोन्योनैवकश्चन यत्रःसर्वाणिधामानितेजस्थानानिसर्वतः भुवनानिसदे
वायंब्रह्मैवावगच्छति यत्रब्रह्मादयोदेवामरणादिविवर्जिताः प्राप्नुवंतिसदामोक्षमहंब्रह्मेतिवो
धतः तृतीयस्यात्मनःस्थानेविश्वमायाविवर्जितेः स्थानानीहसतेजांसिप्रेरयन्तोजनेष्वपि भक्तेषुवर
दानाद्यैःसर्वदाभक्तवत्सलः द्यावापृथिव्योःपरितोयातिसयउपर्यधः लोकानपिदिशास्तद्वत्स्वर्गा
द्यान्गोलकांतरे आवश्यभाविनःकर्मकार्यान्सस्यफलात्मनः नेतेस्त्रात्मरूपंतंविसृज्येहजगत्पटे

ना

ग्रा॰ तेनस्वात्मरूपेणतदपरंपनिजंवपुः स्वात्मतोपरिमज्यतदभूतब्रह्मनिर्गुणं परीत्यलोकार्थानभूता
पु॰ न्यपितथैवसः चतुर्विधानिपंचापिसृष्टिर्योपिदिशःस्तथा प्रजापतिः प्रथमजः फलयःकर्मणामिह ।
२८७ आत्मनात्मानमालोच्यह्यात्मैवाभूत्स्वयंप्रभः सदसत्मगिमित्यादिमैत्रैर्नानाविधैरपि प्रतिपाद्योमहेशो
287 योजगञ्जडवपुस्थितः स्वयंप्रकाशविज्ञानादानंदात्मस्वरूपिणः ऋतंसत्यंतथायस्मात्तस्मात्त्रैकर्मणः
फले मानसस्यात्तुपूर्वंस्यात्तत्रैकायजस्मृहि ऋतंसत्यंचचंद्रार्कावितिकेचनपंडिताः अजायततोरात्रिः
समुद्रोविविधस्तथा संवत्सरःततोजातःकालोयंभास्करात्मकः अहश्चैवतथारात्रिंकृतेयश्चरत्सदा ।
स्वतंत्रःपरमेशानोयोजीवघनईयते इदंसर्वंजगतस्तस्यासृजत्तपिविलक्षणं सर्वसृष्टेनकृतेकल्पे ।
कल्पेजगत्प्रभुः चतुर्विधानिभूतानिमहाविधानिपंचच एकादशेंद्रियाणीहपंचप्राणादयोपिच ए
तैः सर्वैः समंदेवोभगवान्भूतभावनः सूर्याचंद्रमसौधातायथापूर्वमकल्पयत दिवंचपृथिवींतद्व
दंतरिक्षंसभागणं यःपृथिव्यांपुमान्नेष वरुणःपापनाशनः पुरुषेणामुनासोपिसंसृष्टःसर्ववत्र
भुः भूतानांमध्यसंस्थोयंविश्वकृन्नभगवान्प्रभुः गोमाभुवनजातस्यस्थितिकालेसमागते एष
पुण्यकृतांलोकानप्रयच्छतिस्वस्वात्मकान् एषमध्यमोभयेनित्यमानंदात्मास्वयंप्रभः द्यावापृथिव्योस्त
मरास्थितयोलडपर्यधः स्वर्गस्थापितयैवायंभयेस्वात्मनिसंश्रिते सचस्वर्गंतथामोदंप्राणिनां २८७

संप्रपश्यति योस्य ब्रह्मा च भगवानात्मज्ञेभ्यश्च विदधुः अज्ञानजं पतदेवाहमहमस्मात्स्वयं क्वचन ब्रह्मैव तन्न
एवाहमहं ब्रह्मेति वाग्जनः मज्ज्ञानात्मच्युते मायाक्लेशकर्माशयात्पुमान् अहमात्मा निरूपेस्मिन्
जुहोम्यात्मानमेव हि इत्यादिमंत्रजानर्थान् विचार्य सततं पुमान् कृत्वा कर्म जपयित्वा च मंत्रान् कश्चि
द्दिह स्थितान् यदाति कीर्तिमान् लोके जायते पुण्यकर्मणा तदा ब्रह्म परं गच्छेत्पुरुषः शुद्धमानसः
चंपकादेस्तरोर्यद्वत्पुष्पितस्य दिशो दश वायुर्वाति सुगंधो यं प्राणिनां सुखकारकः पुण्यात्मनस्तथा
कीर्तिः प्रधावति दिशो दश आनंदयति सततं धीमंतोत्र वदंत्यतान् पुण्यात्मा स हि विज्ञेयः पाप्म
नो यस्सदा भयं प्राप्नोति मरणात्रैवतु च दारादिदुःखतः असिधारासु संनीत्वा गात्रे सोपरि संस्थिताः
अतिक्रमा यथा तास्य पुत्रभ्रस्य परां गुजान् भये भवति तादृक् स्यात् भयमस्य महात्मनः यद्दयं विद
षः प्रोक्तं यच्चतेनात्मरूपतः गम्यते सोयमेव स्यात् आनंदात्मा महेश्वरः अणीयानप्यणीसस्तद्वत्
महीयान्महतोपि च आत्मास्य जंतोर्निहितो गुहो हृदयसद्मनि असंकल्पतमात्मानं स्वस्थचित्तो गु
रोः सदा प्रसादात्वीतशोकः सन्पश्यत्यात्मतया पुमान् सर्वस्य जगतो योयं महिमानमधीश्वरः ईश्व
रादितरा वेमे सततं लोकशरीरगाः जायंते प्राणिनां प्राणास्तथा सतमापि वह्नयः भौमो यो विविधस्त्वेको
द्वितीयो जाठरस्तथा तृतीयः सोमस्तथा विद्युद्दहवश्चदस्यसमते आदित्याद्याश्च समिधः पंचाग्नौ पंचकी

श्रा.पु. ताः श्रोत्रीस्तीतीचक्षुश्रोताः समिधोपि ततोभवन् भगाद्याः सप्तयेलोकास्तेयस्मादात्मनोभवन् कालीचैव
२८८ करालीचन्तीयाश्चात्मनोजवा सुलोहिताततथैवान्याधूम्रवर्णाचपंचमी स्फुलिंगिनी विश्वरूपीसप्तजि-
ह्वास्ततोभवन् लोकायेब्रह्मणोजाताः सप्तसप्तमरुद्गणाः चरंतियेषुसततंवाह्याप्राणाःशरीरिणाः
288 अतःसमुद्रास्संजाताः सर्वेपिगिरयस्तथा नद्योनानाविधास्तद्वत्स्यंदनेयादिशोदश अतोरसास्तत्स्वयंभा
तऊषधोभूमिसंश्रयाः जायंतेयेनदेहेषुजीवत्वंभावनिष्ठते ब्रह्मादयोहियस्यास्यपुरुषस्यविभू-
तयः सख्याहिसमजामंत्रेहंसमंत्रेचजानते छन्नमित्यादिमंत्रेषु यकमेतस्यपिसंगतः वदंतिकव
योनित्यमानंदात्मानमीश्वरं देवानांप्रथमोयस्त्रपुरस्तात्सर्वदेहिनां वर्तमानहृदिस्थित्वाधियःस
र्वाःप्रपश्यति महर्षिरुद्रनामाचब्रह्माणमपिपश्यति हिरण्यगर्भमित्याद्यभगवान्भक्तभावनः
स्तयोजयज्जनःसर्वान्नात्मनःस्वभयाधिया एवंसंप्रार्थ्यमानोयंभगवानधिकारिभिः आत्मानंदर्श
यत्येनेतानप्रतिप्रतिवर्जितं यस्मात्परःपरोनास्तिकश्चित्ज्यायान्नणुस्तथा निष्कलोव्यक्तसदृशो
२कप्रेसा स्वप्रकाशोदिविस्थितः एकस्तेनेदमखिलंपूर्णंपुरुषरूपिणा नप्रज्ञयानधनेनकदाचन ना
रायणःपुमानेषलभ्यस्त्यागोविनानहि पुरुषामोक्षनामायमस्मृतत्वप्रकीर्तितः त्यागेनैवपु
राकेचित्तमामास्मात्मस्वरूपतः वर्णिनादिमहत्वेषुभाग्यवंतोनवेतमाः स्वर्गादपिसमुत्कृष्ट २८८

मानंदात्मानमीश्वरं स्वप्रकाशं समाप्नोति यतयो गुहवासिनः निहितं स्वात्मनो बुद्धौ तादात्म्या भेदवर्जिताः
वेदांत आत्मविज्ञानसुनिश्चितपदार्थकाः संन्यासयोगतः शुद्धाचिता शान्त्यादिसंयुताः यतयो योगतजी
वतः साक्षात्तेनैव विजानते तेस्तत्वा ब्रह्मणो लोके गत्वा ब्रह्मसमाः सदा आत्मविज्ञानसंपन्नाः संस्थिताः
परमामृते ब्रह्मणो देवयानेथ ब्रह्मणा स्वात्मना सह अमृता जीवा आनंदादानंदात्मानमात्मना ग
त्वा मायादिनिर्मुक्ता मुच्यंते सर्व एव ते अत्राल्पे हृदयांभोजे स्वांगुष्ठेन सम सदा विपापे परमे वेश्म
नि तेस्वात्मस्वरूपिणः पुर एकादशद्वारे विहिते विश्वकर्मणा अणोरणीयांस्तस्मात्त वर्त्तते यः प्रमा
नपरः आनंदात्मा हृदाकाशः स्वप्रभो दुःखवर्जितः साक्षात्कृतो वनचापि ब्रह्मलोके यथा भुवि यत
यः परिमुच्यंते नान्यथा ते पि कर्हिचित् यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः तस्य प्रकृतिली
नस्य यः परः स महेश्वरः अत्र वापि च तत्रापि च समो ज्ञेयः यतः सदा अत्रैव च ततो ज्ञेयः स्वात्मनो
देमसिद्धता स्वस्मिन्नत यतिस्वस्यजयशीलान्महात्मनः ओंकारः स्वरतस्माद्उच्यते वेदवादिभिः
निश्चलेन भवेच्चित्ते यदात्मश्रवणेन च ओंकारेण तदा तेषामात्मज्ञाने श्रुतिर्जगौ उच्चारितो यमो
कारः कारणं यत्र लीयते तस्मात्स्वरं चिंतयंत आत्मज्ञानं विजायते अणोरणीयान् हृदये पुरुषो सू
त्रकीर्तितः सहस्रमस्तकः सोयं महतो पि महान्यतः सर्वदेहेंद्रियप्राणाः सर्वे वास्य स्वदुःखदः वि

आ॰पु॰ स्वरूपः स्वयंज्योतिर्नारायण इतीरितः मायानारेति संप्रोक्ता तत्कार्यं नारजं तथा तत्रायं वर्तते यस्मात्तेन
नारायणः स्मृतः आपो नारा इति प्रोक्ता आपो वै नरसूनवः आधारस्ता विराजो यत्तेन नारायणो हि सः अ
२८५ पां वायः समाधारः स्वच्छरूपी महेश्वरः भूमेराधारभूतानां ततो नारायणोथवा स्थूलसूक्ष्मवपुर्योयं
289 विराट् सूत्रं च वानरः महाभूतात्मकस्तस्य हेतुर्नारायणोथवा नराणां वापि जीवानां स्थिरजंगमरूपिणां
तादात्म्यादयनं यस्मात् तेन नारायणोथवा पुंसो निसर्गसिद्धास्तु कामक्रोधादयोपराः अभानजं भवे
त् दुःखं यत्र तज्जडमुच्यते आनंदात्मा स्वयंज्योतिर्विपरीतो यतस्ततः नारायण इति प्रोक्त एष वा वेदवादि
भिः आराः संसारचक्रस्य क्लेशकर्मादिकाः स्मृताः परिणामेन यत्तेषां मायायास्तास्रयः उच्यते नाराय
णस्ततो भिन्नो विकाररयविवर्जितः परमात्मा च मायाया आश्रयो वात्र कीर्त्यते नरसंवर्धिनी नित्यमभीष्टा
सर्वदेहिनां श्रीरियं सकला नानारूपात्यंतमनोरमा सर्वदा सुखदा पुण्यकारिणां प्राणिनामिह पा
पिनां दुःखदा तद्वदस्यास्या निर्गमेन च स्थिता यस्मात्परे पुंसि निस्खलानंत एव सः नारायण इति प्रोक्त ए
ष वा ब्रह्मवादिभिः नरसंवेधिनी वेयं बुद्धिः सर्वशरीरिणां नानार्थदर्शिका तस्याभासकः स्वस्य तेजसा
तस्य ज्ञानादिरूपो यमानंदात्मा स्वयंप्रभुः नारायणो थवा यस्मात्तस्मात् अन्यत्किंचिन्न विद्यते अयमेव स्व
यंज्योतिरक्षरं परमं पदं विश्वं परमो नित्यो विश्वरूपः सनातनः अविद्यासहितानक्लेशान ... । २८५

पापानि च महांत्यपि स्मृत्यादिना हरत्येष यतस्तेन हरिः स्मृतः पुरुषो विश्वमेवेदं तेन विश्वमुपजीवति ।
पालयत्येष निखिलं विश्वं यस्मात्प्रतिष्ठितः आप्नोति च यतः सर्वं स्वात्मनात्मा च तेन सः शिवः पर
मकल्याणो मंगलानां च मंगलं आनंदात्मप्रदानेन क्लेशं ब्रह्माद्युपजीवति च्युतिर्विनाश इत्युक्तः काला
द्रा वेष्णु यो भवेत् अच्युतो मृत्युभयदः कालकालो यमीरितः ईश्वरो जगतो यस्मान्नियंता भगवा ।
नयं शाश्वतस्त्वयनो नायमंयं गच्छति कर्हिचित् महद्भिश्च महद्दैवा यं ज्ञेयो ब्रह्मादिभिः पुमान् सर्वेषा
मपि भूतानामेष एव परागतिः ज्योतिषो रविराटस्य स्वात्मशब्दाभिधस्य ते परमात्मा परं ज्योतिर्ब्र
ह्म तत्त्वं परं तथा ध्याता ध्यानं तथा ध्येयं सर्वं नारायणात्मके यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयते ।
पि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः अनंतो व्ययमप्यत्रमुच्चसप्रभः सर्वदर्शनः अ ।
गाधश्चलधेरस्य संसारस्य जडात्मनः मायापाकारणोतिष्ठ मायादिपरिवर्जितः एष सर्वगतो ह्यात्मा
हार्दं रूपमेत्र लभ्यते अणीयस्यात्मनो बुध्या तेनोणुः स्वयमीरितः यथैवाष्टदलं पद्मं सरः कोमकुली
कृतं एवं हृदयपद्मं तत्त्वं लंबते हृदये स्वके अतिरम्यं हि भूतानां च सच्छिद्रमधोमुखं वितस्तिमात्र
नाभेदेशे नाभेरूर्ध्वमवस्थितं सर्वं छिद्रं तत्र चक्षुः स्यात् पश्चिमे वागिहेरिता श्रोत्रं च दक्षिणे छिद्रमनं ए
तरमीरितं मध्यछिद्रं तथा घ्राणं जिह्वामूले तथा स च गले भूमिरिह प्रोक्ता ऽन्तरसोंतरस्तथा म

८ ५७

८

ओ॰ नोयोगोभिर्दृनित्यं मानसाख्यं प्रकीर्त्तिते गलतोप्यधरोत्तरस्यात् वितस्तिपरिमाणतः सोमाग्निरविभिन्न
पु॰ त्रविद्युद्दृतेजसाद्युत भातिविम्बसमाक्रान्तस्य ह्यात्रयोयोगिनोसदा विश्वस्यायतनेयतः तस्माद्देतन्म
योगिभिः हत्स्मृते अत्यल्पमपिविद्वद्भिःस्वात्मदर्शिभिः नानाधातुशिलाप्रख्यैरष्टिभिर्वपुषिस्थितैः सोमा
दिधातुचित्राङ्गैः सर्वतः परिवेष्टितं प्राकारेणयथारत्नः सरःप्रासादसंश्रयं तस्यान्तःसुषिरंसूक्ष्म
२५. हृत्पद्मस्यवर्तते तत्रस्थयाधियायोगादानेदात्मोपलभ्यते यस्मिन् प्रतिष्ठितेसर्वंरज्ज्वांसर्पादि
290 स्तदाप कंयथा मध्येहृदयपद्मस्यमहानग्निसमाप्युमान् आनेदात्मास्वयंज्योतिर्विम्बार्चिर्विश्वतोमुखः
बुधुपाधिंसमाश्रित्यभक्तोविषयजंसुखं अग्निप्राणात्मकश्चासत्त्वाहारंविभजन्निव स्थूलमध्य
प्र मसूक्ष्मांशैर्जठरेसर्वदेहिनां तिर्यगूर्ध्वमधश्चैवरश्मयस्तस्यसंतताः संतापयतिदेहंस्वमापा
दतलमस्तकं त्रिधात्वादिरूपमापन्नोजाठरोदहतेजसा स्वप्नज्ञानादिरूपेणयदायेनोपलभ्यते त
दामुनाप्रकारेणचिन्तनीयोमनीषिभिः तस्यमध्येदीपशिखाहार्दीभोजस्यातिष्ठति अणीयसी
तप्यैवोर्ध्वंज्वलेनीतिनिश्चलासदा नीलतोयदमध्यस्थाविद्युल्लेखेवभास्वरा नीवारशूकवत्तन्वी
पीताभास्वत्यणूपमा मध्येतस्याःशिखायाःसपरमात्माव्यवास्थितः ब्रह्मायंशिवएवायंह
रिरेषसनातनः सएवेन्द्रोत्क्षरंतहत परमस्वराट्प्रभुः आदित्योवाएषइतिप्रभातिमाणाई २५.

श्वरः नानारूपस्वराड् एष विराड् एव च कीर्त्यते सत्यं तपो दमः शान्तिर्दानं धर्मः प्रजा तथा आहिताग्निर्हो
त्रं च यज्ञा मानसमेव च एकादशात्र सत्तत्यन्यासः कृत्या विधीयते सर्ववर्णाश्रमाणां स्यात्स्वधर्मसा
धनं परं अर्थे कामे च मोक्षे च तेषामपि च साधने धर्मात् सर्वमेवात्र इष्टं वरं च प्रसिध्यति धर्मः सर्वस्य
जगतः स्थितिहेतुरुदाहृतः धर्मे ह्युपसर्पन्ति प्रजाः सर्वा महाजने सा सेव्यं फलं उष्यादिः स्वर्गमार्ग
स्थितं यथा ज्ञानाज्ञानकृतं पापं सर्वं धर्मात् विनश्यति सत्यं तपो दया दानं च मुख्या हृद्धर्म ईरितः स
वैरपि सदा सेव्यो जन्मतो मरणावधि सत्यवाचनिको धर्मो यया हि सार्थवेदनं उक्तार्थतत्त्वबाल
नमिदं मुख्यं मनीषिभिः सत्यवाक्यादिमे सर्वे लौकिका वैदिकाश्चापि व्यवहाराः प्रवर्तन्ते कालान्तरफ
लेष्वपि अजातशत्रुप्रमुखा सत्यवाक्यादिवर्गतः नष्टावतेनतो वापि सत्यवादपरायणाः सत्येन
वाति वातोयं सूर्यः सत्येन रोचते सत्येन विधृता भूमिः सर्वं सत्ये प्रतिष्ठितं शीतवातातपादीनां सहनं
क्षुत्पिपासयोः संकल्पान्तद्धि विज्ञेयं ग्राम्याचारादिवर्जितं तपसा मनयो देवाः स्वर्गमपत्र जेसिरे सं
तपो यन्त्र विजयन्त इह लोके च मानवाः सर्वमेव जगन्नित्यं तपस्येव प्रतिष्ठितं तपसा यतन एवायं शा
यानत्रहूर्ध्वेवत तपस्ततो निर्दग्धं साधनेषु उत्तमं स्मृतं दया दानं च शान्तं च न विना प्रजा
यते यतो दमः शमश्चेति द्वयं साधनमीरितं बाह्येन्द्रियाणां विजयो दमः प्रोक्तो मनीषिभिः ह्रषभस

आ.पु. प्रमत्तस्य यथा वं धनतो भवेत् ब्रह्मचर्यरतास्तेन बाह्येंद्रियविनिग्रहं कुर्वन्तः स्वर्गमायांति ब्रह्मलोक
२५८ मथापि वा परित्यज्याखिलेषां सफलं मरणान्तरं शमं इच्छाभिलाषो यस्मान्ने दान्तस्वरूपिणः ।
हित्वा विषयजान्सर्वानभिलाषानसौ देवहि यथा व्याध्यादिदोषेण विषयेच्छा न जायते एवं विष
७९१ यदोषेण विषयेच्छाजनिर्नया शमः कथ्यते पुंसो विषयेच्छाविवर्जनं आरण्ये शमसंपन्नाम
नयस्वार्थसाधकाः शान्त्या कुर्वंति भूतानां शिवं हिंसाविवर्जनं स्वर्गं वसनयायान्ति कामक्रोधादि
वर्जनात् कामक्रोधादिसंपन्नः पुमान् शमविवर्जितः ज्ञानकर्मेंद्रियगणजयस्थः स्यात् प्रमादवां ।
कर्मणा मनसा वाचा कुर्वते भूतहिंसनं हिंसको निर्दयः कोऽनु पुमान्कुर्यात् दयामयो ततः शम
दमौ ज्ञेयौ परमं साधनं त्वणा दानं वाच यथा बुद्धेर्विज्ञस्य विविधस्य च शरीरस्यापि कुत्रापि को
विदिक्कं निर्पंडितैः प्रशंसंति प्रजानित्यं कर्णावल्यादिकानिह वदान्या दानतः स्वर्गं व्रजन्ति सततं ।
ते नराः यज्ञाः समर्पितायोनि दानतो दक्षिणान्मनः दातारं सर्वभूतानि स्मरयेत्पितरं यथा दानतो
वैरिणोपि सुमित्राण्येव न संशयः दानेन च निहंत्येतान् पापज्ञो नरो भवि दानेसर्वमिदं विश्वंप्र
तितिष्ठति सर्वदा चतुष्पादेषु धर्मः स्यात् सर्वेषामिह देहिनां नवर्णमाश्रमं वापि नवयो वाप्यपे ।
क्षते गृहस्थत्वं वपश्चापि हि यापेत्येव प्रजाजनिः मनुजानां भवत्यत्र सर्वेषामपि देहिनां कः कुमारः २५८

पुमान् प्रजायया वा विवर्जितः उत्पादयेत् प्रजा दीमान् उत्सुको पि प्रजापतिः प्रजावान् कीर्तिमाप्नोति
सुखं वैरिञ्जयं तथा पितॄणामनृणो भूत्वा स्वर्गं याति निमृतः पुनः संसारस्य सुखं वन तस्मात् प्रजा का
र्यणमीरिते मोक्षाख्ये प्रायशो विघ्नः कथितः पण्डितैरयं प्रजानां मोक्षहेतुत्वं केचिदिच्छन्ति वा
लिशाः उपपत्तिमिमां तत्र प्राहुः कामज्वरातुराः आरुरुक्षोर्यथा लोकः प्रासादं समभूमिके
निःश्रेणिके समासाद्य शनैः प्रासादमस्तके व्रजेत् सैयानयं लो चपदन्यासक्रमात् पुमान् एवं ध
र्मैत्तयाचार्थः कामो मोक्षस्य कीर्तितः चतुर्विधः पुमर्थो यं उपर्युपरि संस्थितः धर्माधर्मस्वा
मोक्षप्रमान् लोकद्वयेपि हि अर्थेतस्वतथा कामे कामात् मोक्षं च धीधनः दारिद्र्यदुःखसंपन्ने
पापिनं प्रवदन्त्यतः श्रीमन्तं सुखसंपन्नं पुण्यात्मानं च लौकिकाः धर्मात्रहि द्विविधः प्रोक्तो दृ
ष्टादृष्टफलोन्नतिः यद्दृष्टफलो नार्थकल्पो दृष्टफलस्तदा पापिनामपि सोर्यस्यात् जन्मो
तरकृतो यतः दृश्यते सुखिनः कार्यं न विना कारणं भवेत् पुण्यात्मानं तथैवैतत् पापजन्मान्तर
स्थिते ग्रहनीयं यतो दुःखं न विना तेन सैभवेत् सुखं धर्माज्जतो नित्यं जायते सर्वदेहिनां सुखं
वैषयिकं नार्थं विना कस्यापि संभवेत् धर्मात्मापि विना नारीं स्त्रीसुखं नाधिगच्छति न प्रजान
गृहस्थस्यान्त्ववार्यं लोके पुकर्हिचित् अन्नं विना न तस्यापि चतुर्धाश्रामि प्रयान्ति हि अन्नं नार्यादिकं

ग्रा॰ वृ॰ २५२ 291

सर्वैर्दुःखदंविद्यतेनहि निर्धनस्यततोनित्यंअर्थीकामस्यकारणं अर्थहीनंपतिंनारीत्यजेदपिप
तिव्रता पितरंप्राणतःस्निग्धं अर्थहीनंसुताअपि निर्द्धनंसर्वएवैतेऽवमंसंतेपुरतःस्थितं अवज्ञा
नंतिमित्राण्यमानवाधनगर्विताः कुलंशीलंतथाविद्यागुणानानाविधाअपि निर्धनस्यन
कार्यायपद्ममंतेशिववत्स्थिताः धनीभोगान्समाप्नोतिधनीस्वर्गंचगच्छति विपुलांचतथाकीर्ति
गुणान्नानाविधानपि अर्थतस्ततएवायंकामोभोगाभिधोनृणां जायतेत्रविशेषेणना
रीसंभोगसंभवः जातःपुमानकामोऽयंकोपिनास्तिजगत्त्रये सुखेच्छाकामउद्दिष्टःकस्यसान्नन
विद्यते वृद्धोवालोयुवावापिपुमानवाप्यथवापशुः स्त्रीवानपुंसकेवापिजंगमेस्थावरेतथा
सर्वैःसहृश्यतेनित्यंकामकंनिखिलंजगत् ततोविरक्तिःकस्यास्यात्सौख्यभोगंविनानन ।
रागाभावेविरक्तिःस्यात्नरागस्यजनिःविना उत्पन्नोत्रकथंरागस्तद्रोगमन वाप्यसः विनश्य
तियथालोकेच्छुधानान्नंविनाक्वचित् अपिरागोत्रसंजातोविषयावाप्तिवर्जितः जननीमिव
संरुध्यशिष्युःचिंतेयमवस्थितः तस्मिन्साजिनयातेववितेत्रविषयांतरं समस्तःकृतएवैष
द्धरायात्तोभविष्यति मदप्रभिन्नकरटःकुंजरःषष्टिहायनः अरण्यानियथैवैषसूक्ष्ममार्गप्र
चारकः निरुध्यद्वारस्तिष्ठन्प्रवेशनंप्रयच्छति एवंविषयसंभोगरागःचिंतवतेस्थितः कथं २५२

रागांतरस्यायंप्रवेशंदातुमर्हति अपिस्त्रीनामसमोविह्विरागोयोषिद्रूणास्थितः मंदोदरीपतिःश्री
मान्रावणोलोकरावणः त्रैलोक्यैश्वर्यमतुलंवप्रमंडलमंडितं चक्रमेनकथंनामपुमानन्यः
स्तदंतरे नलसंलग्नहृदयादमयंतीप्रसंगतः शक्रादीनपिसंप्राप्तान्नववे पुरतःस्थितान्
एवमन्येपिवहवोरागांधयोषितांजनाः नगामिष्यंतितोयांतितन्यातांविषयांतरे अत्रापिविध
तेनैवशक्तिर्येषांस्तदंतरे अलौकिकैकयमोदेशक्तिस्तेषांभविष्यति ततोमोक्षेपुमानेवगा
छत्कामान्हृदिस्थितान् अनवाप्यापिधीमान्यामदधीकिंपुनर्जनः अनधीत्यद्विजोवेदा
ननुत्पाद्यतथासुतान् अनिष्ट्वाचैवयज्ञैश्चमोक्षमिच्छन्व्रजत्यधः एवंमनुरपिप्राहप्रत्य
मोक्षःशरीरिणां इदंरागस्यमाहात्म्यंजानानःसर्वविन्पुमान् ततःसर्वोपभोगेनक्षीणरागेव
सर्वतः विरक्तोमोक्षमार्गायमनःकुर्वीतपंडितः इत्यादिबहुशोमदाः सर्वदाभोगला
लसाः जल्पंतिनहिवःकोत्रगृह्णीयात्पंडितःपुमान् सुखेपुण्यस्यहेतुत्वंदुःखेपापस्य
चैवहि एतत्तथेतिकोनाममन्येतदभाषितंपुमान् अर्थस्यसुखहेतुत्वंयदुक्तंतद्यथैवहि
अर्थहीनाश्चसुखिनोदृश्यंतेबहवोयतः अर्थिनोदुःखिनश्चैवलोकेशतसहस्रशः
अर्थंविनापिभोगाग्निर्मन्वाद्येमैत्रेयरिता याज्ञवल्क्यस्यमैत्रेय्याःसंवादेश्रवमेवतत् प्रति

श्रा॰सु॰ ष्टाः विष्णोर्यस्मादर्घोरुः स्वसाहेनवः तेमः कथंस्तवेनामभवेत्यं ष्टिनह्रूपिणां वध्यादयोऽट्रि
ट्रस्यविमुखासुरिनीरिते यत्तत्काचित्केमेनतस्मायनासर्वत्रनैवनत् सर्वेछासर्वभूतानामीरि
२९३ तापातयैवमा तावतावामुकेकेनजगदेतत्तृविष्यति कामकोविषयासक्तः पुमान्लोकेसमी
293 रिता नस्त्वेवकुस्ततोन्यायस्ततोऽयत् किंविदीरिते रागएकत्रसंजातोनिरुध्यादिविषयांतरेराग
मस्माकमेतत्त्वनानिष्टंमोक्षरागिणां मनोहृक्तिः समुक्तायामोक्षनिंदापरामुना नसामो
क्षस्यनिंदायोंऽसंहतेतितिहृणोभतो मोक्षोमनोरथनिष्ठश्चेनयमध्यायकथ्यहिसः मोक्षध
र्मं वदेत्याज्ञो मनुःसर्वार्थदर्शकः आनंतर्यंचतस्सेभ्योनैष्ठ्यंयुक्त्यावलोकिते अनेकशानशा॰
ख्यानोभेदैर्नामाविधानिमान् ब्रह्मापुरपिविज्ञात्रः कोधीयानजगत्त्रये पुत्राणांचवहूनांसा
त् त्रिभुवेकपरेतया अनेनेषुहृदयंवैततशकोकर्त्तेनमानवः एवंयज्ञेषुविज्ञेयावहूसंख्या
सदैवसा अशाकोविधछामग्रशास्त्रतत्प्रजायते त्रिषुआश्रमिषुयज्ञेश्वस्वशाखाध्यायनो
६ पिच मोक्षेसछामकुर्वाणाहृश्यतेनवृहृत्वाद्विजाः नियमः परिसंख्यावाहृयमेतत्रसंभवे
त् अशाकात्वादिहृछाकोभवंतीविनिवारयेत् एतत्त्रयंपुरामर्त्यःकृत्वैवेछेन्नचान्यथा नि २९२
यमोयमशाकोर्थैव्यर्थएवप्रजायते एतत्त्रयंचमोक्षेछासवत्पणहृदयंयदा नदेछायाः परि॰

त्यागात्परिसंख्याप्रसज्यते एवं मोक्षोनुपाद्यः सर्वदैव भविष्यति तत्रोक्तं रूपाणां सर्वमनिष्टं च मनो
कथं रपि ज्ञात्वा प्रत्ययस्य वैपर्थ्ये परिसंख्याकरोतिहि व्यावर्त्यायाः नस्यात् इच्छायाः परता ततः इच्छन्नप (९)
नगिरे वै तत्प्रसक्तं नैव दृश्यते अर्थवादस्ततो ह्येषविध्यर्थासंभवात्भवेत् अनिच्छानविधे
यात्रमोक्षस्य भावरूपतः अभावो न हि केनापि कर्तुं शक्यः पुरास्थितः ब्रह्महत्यादिवत्राये मोक्षः
शास्त्रैर्निषिध्यते ध्रुवोपि च ततो नायमिच्छायाः प्रविधीयते विहितोपि भवेद्व्यर्थः पुनरिच्छा
मु जनोन्मुखाणां निसर्गसोदरे मोक्षे प्रसिद्धे लोकवेदयोः कर्मणां स्तुतिरेवेषा क्रियते मनुनायतः
संसाररागिणो वीक्ष्य कर्मणोत्राधिकारिता सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि संपश्यन्ना मा
त्मयाजी वै स्वाराज्यमधिगच्छति एवं वदन्मनुर्धीमान्वेदान्तार्थविशारदः सर्वज्ञो मोक्षका
मं तं कथमेष निवारयेत् ततो मनोरभिप्रायमज्ञात्वा बालिशैरिह उदाहृतं वचः कर्मस्त्या
वकं न्यायसंयुतं सर्वभोगाप्यलाभेन वैराग्यं समुपागतः मुक्तिमेतीति यत्प्रोक्तं तत्तु कामा
ग्निजृंभितं सर्वेषां विषयाणां चेत्लाभान्मुक्तिर्नृणामिह विरक्तो जायते तेन भवेन्मुक्ते
रसंभवः अनंतभेदसंभिन्ना जीवानां योनयः स्मृताः तत्रापि शतधा भेदा वर्तंते वानरस्ति
ह एकैकस्याः शरीरस्य व्यक्तैः संति सहस्रशः विषयाँसंख्यायास्तान्कश्चेत्समुपाव्रजेत्

आ॰पु॰ अपिमोक्षंधियाप्नुवन्पुमान्नरकमाव्रजेत् नरकेऽपियतःसंति विषयाबहुभेदिनः अपिस्व
र्गादिसंस्थानविषयाडुर्लभा हिये सर्वेनैकेनलभ्याःसुर्यज्ञानामयुतैरपि हिरण्यगर्भसंप्रा
२५४ प्तौभोगःकोपिनविद्यते यस्मादस्मात्रकोप्यन्योभोग्योयोनैवदृश्यते हिरण्यगर्भसंप्राप्ति
२५५ र्दुर्लभाप्रथमेत्विह साधनैर्विविधैःसत्यांचास्यांनास्तिप्रयोजनं नचाकामस्तत्संभोगात्विन
श्यतिकदाचन किंतुसंभोगतोभूयःसर्वस्मादधिकोभवेत् नजातुकामःकामानामुपभोगेनशा
म्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते यत्पृथिव्यांव्रीहियवंयच्चास्तिवसुकिंचन एक
रा स्यापिनपर्याप्तंतस्मैपुंसोत्रकामिनः ततोविषयसंभोगोनविरागस्यकारणं किंतुरागस्यसत
तंसर्वेषामिहदेहिनां तत्रोर्थतोभवेत्कामःकामान्मोहस्ततोरितं कामुकैरर्थलुब्धैश्च
स्वप्रसिद्ध्यैवसर्वथा उपायस्त्वेकएवात्रयोस्यरागस्यविद्यते सर्वेषांदेहिनांतस्मात्विषय
दोषदर्शनं दोषदृष्टिश्चबहुधावर्णितातेपुरामया ऐतरेयादिविज्ञानेसंवादेप्यधिका॰
रिणांसंक्षेपतोस्तिमांभूयःस्मरणायवक्ष्यामितेधुना विषयःसर्वएवायमनात्मानश्वर
स्तथा दुःखोदर्कःपारतंत्र्यमस्त्यस्तिपतिसर्वगः नरकेब्रह्मलोकेवाप्युतवापरमेष्ठि
नि समोदासहिसंभूतो विनाहंतांमनोगतां पंचभूतात्मकोयंहितद्भूतावासःस्मृतोभवि॰ २५४

ब्रह्मलोके पितृवत्सब्रह्मणोव्यक्तजन्मनः जन्ममृत्युमृतोयद्वत्तद्वत्पुंसः परस्य च सशरीरोयथा
दुःखी स्यात्तथाप्ययमपुमान् तस्मादित्यादि मनसा विचिंत्य बहुधा पुमान् वांतवत् विविधान्
भोगान् त्यजेति ब्रह्मवादिनः ततः प्रजननेंतदुपायो ब्रह्मबोधने किंतु पुत्रादिलाभार्थं काम
कस्येह कीर्तितः सत्यादयो भवेत्यत्र ब्रह्मज्ञानस्य साधने यथा प्रजननं लोके सुखपुत्रादिसाध
ने यथा प्रजननं लोके सुखपुत्रादिसाधनं अपि चैतत् स्वतः सिद्धमाहारादिसमं सदा पश्वा
दीनां कथं नाम वेदेन्कार्यं श्रुतिरिविदं अथवा लक्ष्य श्रुति प्रोक्तं कार्यं प्रजननेत्विदं अत्र प्रवच
नस्यार्थं विभलव्यववलोकतः यथाध्यायने प्रामेव्रतत्यर्थं ब्राह्मणस्य हि तथापि न विधेयेत
दत्र वेदांतबोधने श्रवणं तत्तएवैतत् पारिशेष्यात्भविष्यति अस्मिन्संदेव यह्यादिनापेते
केनचित्क्वचित् किं तु संन्यासरावेकः शोत्यादिगुणसंयुतः विवेकिनो विरक्तस्य मुमुक्षोर
पिपेक्षते त्रैवर्णिकानधीतांस्तान् कृतदारानपेक्षते अग्न्यादित्रयमत्रैतत् वक्ष्यमाणं हि
वैदिके जातपुत्रः कुलके शास्त्रिवर्णिदोषवर्जितः विहान्सामर्थ्यसंयुक्त आदधीत वि
धानतः अग्नीन्पंचापि वा त्रीन्वा श्रौतान्कर्मप्रसाधकान् जाययैव त्रसंयोगादेकं
स्मिंचके चना स्मार्तं वदंति मनयस्तेषां शक्तेरभावतः अग्निभिः कर्मणः स्वर्गं व्रजंति ज्ञा

आ॰ सु॰ निनोऽपि च ब्रह्मलोकं तथा कीर्तिं सर्वे लोकद्वयेऽपि च अग्निहोत्राभिधं कर्म सायं प्रातः कृतादृतं अग्न्याश्रयं विरा
गेण विना च मरणावधि गृहस्थानां गृहे नित्यं सूनाः पंच वसंति हि कंडनी दलनी चुल्ली येवणी मार्जनी त
२९५ था आभिः कृतस्य पापस्य स्पर्शो नैवाग्निहोत्रिणः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्या
295 ज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः अस्य विश्वस्य हेतुः स्यादग्निहोत्री पुमानिह देवानां जननीतुल्यः प्रोक्तो
यं वेदवादिभिः यथेह क्षुधिता बाला मातरं पर्युपासते अग्निहोत्रिणमेवं ते देवा नाकसमाश्रयाः अ
ग्निहोत्री जने कीर्तिं धनमप्यधिगच्छति यज्ञानपि करोत्येष दर्शादीन् परानपि नाकं प्रयाति मरणा
त् परं देवैर्नमस्कृतः विद्वांश्च देवत्वं गत्वा ब्रह्मलोकं च गच्छति यज्ञेष्वेतत्फलं प्रोक्तं स्नानदानेऽपि की
र्तितं साधनं सर्वमेवैतत् वक्ष्यमाणं च सर्वदा अपेक्षया भवेद्भूयः कस्यचित् किंचिदेव हि साधनानि
दशैतानि त्यागेन सहितान्यपि एकस्मान्मानसान्नित्यं प्रभवंति न चान्यथा मनस्वी धैर्यसंपन्नः पुमा
न्स्वपरतः सदा अनुतिष्ठति सर्वं तु नापरो दीनमानसः मनोमूलमिदं सर्वं लौकिकं वैदिकं तथा
प्रवृत्तं च निवृत्तं च कर्म सिध्यति देहिनां मानसं तत एवैतदुक्तमेकादशं त्विह प्रजापतिः पुरा
सृष्ट्वा मनसैव जगत्त्रयं पवित्रः प्रथमः श्रेष्ठ आसीत्सर्वशरीरिणां प्रजापतिर्यथा तद्वन्मतयो दे
वता अपि मनुजाश्चाभवन्सर्वे मानसस्य प्रसादतः इदं ततोऽधिकं सर्वसाधनेषु प्रकीर्तितं मानसं २९५

सर्वभूतानांस्वर्गमोक्षंचगच्छति लिंगधारणरूपोयंत्यागोब्राह्मणजन्मनः अलिंगात्तुक्रियादेःस्यात्स
मएवात्रधर्मतः अयंचतुर्विधःप्रोक्तोमुनिभिर्वेदवादिभिः त्रिदंडोद्विविधस्तद्वत्एकदंडोपिमादृशः
कुटीचकोबहूदकस्तुद्वौत्रिदंडेप्रकीर्तितौ हंसःपरमहंसस्तुद्वावुक्तावेकदंडिनौ पुत्रीगृहीधनी
तद्वत्भार्यापाचविवर्जितः जरसाव्याधिनाचैवग्रस्तःस्निग्धःसुतादिषु भिक्षायाभोजनेतद्वत्स्त्र
शक्तोमन्दकुलःपुमान् त्रिदंडंधारयेद्देवगृहेकृत्वाकुटींसदा पुत्रदत्ताशनोनित्यंस्वधर्मपरिपालकः
कुटीचकोभवेद्भिक्षुःप्रणवादिजपेरतः विधुरोयःपुनर्दारान्संपादयितुमक्षमः ब्रह्मचर्यरतः
कर्मश्रद्धावांश्चजरादिना पुत्रादिषुगतस्नेहोनष्टभार्योपिवासये त्रिदंडंपरिगृह्णेषभवेद्विप्रोबहू
दकः कमंडलुंत्रिदंडंचशिक्यपात्रंपवित्रकं दधानःपंचमात्रास्ताःकीटवत्पर्यटेद्यतिः यद्धिधर्मा
नशेषांस्ताननुतिष्ठेत्सदैवसः वैराग्यंपरमंप्राप्तोयश्चिष्टकर्मवासनः यज्ञोपवीतीविशिखःसामगो
त्रयथावद्धः एकदंडधरोनित्यंकीटवत्पर्यटेन्महीं प्रणवादिजपेयुक्तोभवेद्धंसोयतिस्त्वयं वैराग्यप
रमंप्राप्तेरहामुत्रसुखेप्सदा आनंदात्मानमेवैकंसंप्रेक्षमाणहृदयेस्थिते कर्मसंस्कारसंन्यासःसभवेत्प
रमःसदा हंसोविधस्त्यकरतः एकदंडंहिवेणवं एवंचतुर्विधःप्रोक्तःचतुर्थाश्रमवासिनां न्यासस्त्र
नुर्थस्तत्रापिसर्वोत्कृष्टउदाहृतः भूतानांप्राणिनःश्रेष्ठाःप्राणिनांबुद्धिजीविनः चतुष्पादोबुद्धिमतो

आ॰पु॰ चतुष्पात्स्वपि गोगणाः उत्तमा गोगणेभ्यश्च द्विपदाः सर्वजंतवः द्विपत्स्वपि तथा प्रोक्ताः श्रेष्ठा वर्णाश्रम
२५६ माश्रयाः शूद्रेभ्यश्च तथा वैश्या वैश्येभ्यः क्षत्रवर्णिनः क्षत्रियेभ्यस्तथा श्रेष्ठा ब्राह्मणा जन्मना हि ये
२९८ ब्राह्मणेभ्यश्च समादेवा आम्नायाः परिकीर्तिताः ब्राह्मणेष्वपि विद्वांसो वेदवेदार्थवेदिनः विद्वत्स्वपि
तथैव स्युरुत्तमा निश्चिता हि ये शास्त्रार्थे संशयं हित्वा वर्तन्ते निश्चला इव निश्चितेष्वपि विज्ञे॰
या उत्तमा ये त्वकर्मिणः आश्रमाणां विभेदेन चतुर्धा ये प्रकीर्तिताः वटुभ्यो ग्रही ज्ञेय उत्तमो
गृहिणोऽपि च वनी ततो यतिः सोऽपि चतुर्धा परिकीर्तितः कुटीचको बहूदकश्च हंसैकः चतु॰ परमहंस
र्विधो यतिः प्रोक्तो योऽपः पश्चात्स उत्तमः चतुर्थाः परमा हंसा वेदब्रह्मविदः स्मृताः ब्रह्म॰
निष्ठा यतस्तेषां न्यासः स्यादात्मवेदने त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां अकुर्वाणाः
यतस्तेषां तत्त्वज्ञा कर्ममोहिताः कुर्वाणाश्च परं ब्रह्म भवन्त्येव न संशयः ब्रह्म सर्वात्मकं यस्मात्
सर्वमेव समीरितं विद्वांसो ब्रह्मविज्ञानात्ततः सर्वं भवन्ति ते कालात्मकमकालं च सदसत्
त्वपरापरे ब्रह्मविद्यायतस्तेभ्यो नासीन्नास्ति न भाव्यपि उत्कृष्टास्तत एवैते स्मृताः सर्वोत्तमा॰
भवि ब्रह्मविज्ञानदो न्यासस्तत एव परः स्मृतः परं च ब्रह्म तस्मात् पदं न्यस्यात् तत्साधनं भवि
नयश्चादि निकृष्टेन हेयमेवाधिकस्ततः न्यासे ब्रह्मात्मके सर्वजगतो हेतवो द्विजाः विवत्त॰ २५६

शितिमांप्राहुः युक्तिंवेदसमीरितां न्यासात्ब्रह्मात्मविज्ञानेविदुषांजायतेपरः ततोन्यासःपरंब्रह्म
कारणंहेतुवर्जितं यतःसूत्रमिदंजातंसमस्तंयच्चभूतकं हिरण्यगर्भइत्येतदुच्यतेवेदवा
दिभिः अस्मात्प्रजायतिर्जातोविराट्संवत्सरस्वरूपः आदित्यइतिवाप्युक्तोवेदवादरतैर्द्विजैः
आदित्यमंडलेयोयंसुवर्णवर्णःपुमांस्थितः सएवजगतोहेतुःप्रत्यक्षमिहदृश्यते रश्मिभिः
स्वशरीरोत्थैर्यैतोजलदसंश्रितं नीरंमुंचतिलोकेस्मिन्सर्वेषामिहकारिणं स्थावरास्ततएव
तेजायंतेभूमिमाश्रिताः औषध्यःकीर्तिताःयाश्चयेवनस्पतयोपिच स्थावरेभ्योभवत्यन्न
विविधंप्राणिनामिह अन्नतःसर्वजंतूनांप्राणाजीवनहेतवः प्राणतश्चनयैवस्यात्बले
तत्कर्मकारणं बलतएवतस्यायत्नकौतेभगणायुरा कर्मश्रद्धेतनः श्रद्धापरलोकास्तिधी
रपि श्रद्धातोजायतेमेधायस्यात्वेदार्थधारिणी मेधातोजायतेबुद्धिर्मनसोपिनियामिका य
स्यानियमनोनित्यंशास्त्रार्थेनप्रवर्तते मनेषयामनश्चैतन्नजायतेशास्त्रसंस्कृते मनसोशां
जायतेशांतिरात्मन्येवहियात्रधीः शांत्याचजायतेचित्तमात्मज्ञानोन्मुखंहियत् चित्तात्स्मृतिर्भ
वेदैर्वाकार्यैर्गुरुकीर्तिते स्मृत्यास्मारोभवेत्तस्यप्रकाशोवगमात्मकः स्मारात्ब्रह्मात्मविज्ञा
नेश्रवणादिसमुद्भवः आनंदात्मानतःसाक्षात्भवतीहशरीरिणां एवब्रह्मात्मकोन्या।

आ॰पु॰ सोयस्मादन्नस्य कारणं तस्मादन्नं ददज्जंतुः सर्वाण्येतानि यच्छति अन्नतः प्राणिनां प्राणाः प्राणेभ्यस्त्वम
२५८ नस्तथा विज्ञानं मनसो ज्ञानानंदस्तथैवमत्र प्रजायते अन्नं पंचात्मकं ह्येवं पंचकोशेषु कीर्तितं पंचमो ज्ञा
नतो जातस्त्वानंदात्मरवेशवद्भाक् मायया वायमात्मा स्वयो जायते न नतु तत्वतः पुरुषेपि त्रिलोकाख्य
९९७ दिशामपि च रूपभाक् लोकत्रयी दिशस्तत्र द्रष्टवांतरदिशोपि वा इत्थं पंचात्मको जातः प्रमानभेद
विवर्जितः पुरुषेणामुना सर्वमोतप्रोतं जगत्त्रयं तेनैतदैव पुरोभाविभवद्भूतयाप्रमान् जिज्ञा
सया सदा गम्यः पुरुषो मननात्मया अन्नादेष प्रमानजातः फलरूपेण कर्मणः सर्वाणि त्रस
मीचीने वस्तुन्येषावतिष्ठते अद्वयानंततया सत्यादेषा गम्यो महेश्वरः स्वयंज्योतिर्यतस्तेन तेज
स्यपि च गीयते तपसो भक्तपूर्णात्पूर्वं समनुष्ठित रूपिणः वरोतिशयतो यस्मात् वरिष्ठस्तेन क
थ्यते एवंभूतं पुरा प्रोक्तमानंदात्मानमीश्वरं हृदयस्थेन मनसा ज्ञात्वा क्लेशविवर्जितः भे
योनमरणोगच्छेदेनं देहस्य पाततः मत्वा न म्रियते यस्मात् न्यासा च ब्रह्मवेदने अत्रैव ब्रह्म
लोके वासे मायामाज्ञाननाशने तस्मान्न्यासं परं प्राहुः साधनं ब्रह्मवादिनः सत्यादीनां पुरोक्तानां
मेषां साधनरूपिणां न्यासेन गम्यते ध्येयमानंदात्मा स्वयंप्रभः सत्यः सूक्ष्मो विभुः स्वांतःप्रा
णापानव्यवस्थितः संधितयोः प्रजुर्वाणो वामनो व्यानरूपतः ब्रह्मरूपो त्र विश्वस्य धारक २५८

तेजस्समस्तः सूर्यादीनां तथा वर्चो ब्रह्मणादेः प्रयच्छति तेजो ब्रह्मादिहेतुः स्यात् वर्चः सौष्ठवकारणं
वर्चो ददाति भगवान् जाठरोग्निः शारीरिणां पुरुषो हृष्यते येन नीरोगः कान्तिसंयुतः द्युम्नं स्या
त् भास्वरं वस्तु सूर्यस्य किरणादिना जीवनदादि संज्ञातं तदप्येष प्रयच्छति अथवा द्युम्नमादिष्टं
तेज एव मनीषिभिः सूर्याचन्द्रमसोस्तद्वत् अग्नेर्वर्चः प्रकीर्तितं अग्नेः सूर्यस्य सोमस्य वर्चो द्युम्नं
च यच्छति यः पुमान् सोत्र संन्यासात् लभते हृदयस्थितः उपयामोत्र संन्यासोपमस्ति समीप
गः पतस्तेनाम्ना देवागृहीतो वेदवादिभिः उपयामगृहीतो यमानन्दात्मा निगद्यते स्वप्रका
शं परं ब्रह्म सत्यज्ञानादिलक्षणं जाबालादिश्रुतिप्रोक्तन्यासं कृत्वा जितेन्द्रियः तत्त्वमस्यादि
वाक्यार्थवाचकं प्रणवाक्षरं हंसादिश्रुतिसंप्रोक्तयोगमास्थाय धैर्यवान् गुरूपदिष्टमार्गेण
युञ्जीतात्मानमात्मना परां तां महतीं ब्रह्मविद्यां मोहविनाशिनीं देवानां गृह्णतेनाच निधिव
न्नेत्तरं द्विति जानीते ब्रह्मणः सोयं महिमानं समाप्नुयात् यस्मादयं पुमान् गच्छेत् तं महिमानमप्र
तया तत्कामस्तत एवायमेनां कुर्वीत सर्वथा सदेहरूपानिर्वस्य शब्दोयमवदिनः सदा ब्रह्मवि
द्याभिधस्तेन सैवोक्तोपनिषत् द्विजैः तस्मात्तद्वाचकः सोयं ग्रन्थोप्युपनिषन्मतः एषोप
निषदत्रोक्ता गीतिर्गीताभयाधुना ब्रह्मविद्याधिकानां तो ग्रन्थेस्मिन् निगद्यते कश्चित् पुरुषस्या

आ·पु· यथोयज्ञस्तस्योपासनमीरितं मंदानामधिकारस्य विशेषेणैवात्मबुद्धये ॥ ततः परं पुनः किं त्वं श्रोतुमिच्छ
सि तद्वद ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येण श्रीशंकरानंदभगव
२५८ ता विरचित उपनिषद्रत्न आत्मपुराणे तैत्तिरीयसारार्थप्रकाशो नामदशमोध्यायः ॥ १० ॥ ॐ ॥
298 श्रुत्वैवं तैत्तिरेर्ज्ञानं शिष्यो विस्मयमागतः संन्यासनप्रष्टुकामः सन् इदं वचनमब्रवात् ऐतरे
यो द्विजश्रेष्ठस्तथा कौषीतकिमुनिः आदित्यो भगवानेष मतः श्वेताश्वतरोपि च कठश्च ति
तिरिश्चैवनेयज्ञानंतिमहाधियः ज्ञानेनतद्भवनाशोक्तं दुःखसागरशोषकं गुरोयत्र श्रुता एताः
कथाश्चित्रार्थसंयुताः प्रजानां मुनिभिः सार्धं संवादो ब्रह्मबोधने नैरेववामदेवस्यगर्भस्थ
स्य महात्मनः प्रतर्दनस्य शक्रेण विप्रस्याजातशत्रुणा कांडत्रयस्य वंशश्च भेदाभेदस्वरू
पवान् अश्विभ्यामपि संवादः ऋषेः सर्वार्थदर्शिनः दध्यङ्ङाथर्वणस्यापि माहात्म्यं गरुहना
तथा याज्ञस्य साहसं तद्वद्विनोत्तस्याशिष्ययोः याज्ञवल्क्यस्य संवादो मुनिभिर्जल्पसंज्ञि
तः विदग्धेनचपुत्रैमेत्तस्यप्राणाः परीक्षिताः जनकेनचतस्यैवसंवादसंज्ञोमहात्मनः द्वि
वारं यत्र शास्त्रार्थः सकलोपि निरूपितः मैत्रेय्यापि तस्यैव विरक्तस्य महात्मनः मुनीना वा
मपि संवादः कारणस्य च निर्णयः यमेन सह संवादस्तथैव नचिकेतसः भृगोश्च वरुणास्या २५८

पिसंवादोन्यापिकस्थन एतत्सर्वं मयात्ततः अतं ब्रह्मावबोधने अत्रतितिक्षिविज्ञाने साधनानां परंपरा
न्यासानां कीर्तिता न्यासो बहुशास्त्रकृतस्तथा चान्तर्विध्यं च संन्यासे तत्रैतद्भवतेरिते च तत्र्थं परमे हं
से जिज्ञासा समवर्तत प्रज्ञानमत्र चतन्त्वद्ध जाबालाद्यैः समीरिते न्यासयोगं च हंसाद्येतत्तस्त्वश्व
मीरय केश्यं चरितः सर्वैः कदा कस्याधिकारिणः किंवपुः कीदृशाचारः किंफलो मुनिसत्तमः इ
त्यक्तो गुरुणा हेतत् शिष्यवाक्यं महारथी: शिष्यबुद्धिं समालोक्य परं स्नेहमुपागतः अग्रे श्रिमः
वतः सर्वं प्रष्टव्यं समवस्थितं जाबालाद्यैः परो हंसोपनत्सर्वैः समीरितः हंसाद्यैश्च तथा योगो
ब्रह्मात्मैक्यावबोधने उक्तः परमहंसस्य फलसिद्धिर्यतो भवेत् अत्र पूर्वं कृतः प्रश्नो जनकेन महात्म
ना अत्रिणा मुनिना तद्वत् याज्ञवल्क्यमतिद्विजे प्रजापतिमतितथा कृतन्त्रारुणिना पुरा नारदेन
च तद्वत्तु यथार्थं भवता कृतः ब्रह्मोपनिषदि स्पष्टः स्वयमेव समीरितः अयं स परमो हंसो जाबा
लादिश्रुतावपि अतः सर्वं स्वसम्बद्धं स्वप्रश्नार्थं मयेरितं सावधानमनो भूत्वा शृणु एव वक्ष्यामि
तेधुना बृहस्पतेः सुरगुरोर्भ्राता यस्तु सहोदरः विप्र आंगिरसो नाम्ना संवर्तक इतीरितः आरुणि
स्तु सुतो धीमान् आरुणिः सर्वशास्त्रवित् उद्दालकः सुतस्तस्य श्वेतकेतुश्च सत्तमः दुर्वासाः शंक
रस्यांशात्तपसां पतिर्हर्जितः ऋभुः प्रजापतेः पुत्रो मानसः सनकादिवत् निदाघस्तातृ ऋभोः शिष्यः पु

आ॰ ७॰ रायःकर्मठोभवत् भरतोजडनामापिभ्र्यालोयोन्यजन्मनि विस्नोरंशस्तथैवैषदत्तात्रेयोमहामुनिः त
थारैवतनेकःकश्चिद्ब्राह्मणोगुणसंयुतः भारद्वाजादयश्चान्येविप्राःशास्त्रविशारदाः अहंब्रह्मेति वि
२५५९ ज्ञानात्परिक्षीणात्मबंधनाः नमुंडानेवजटिलानेकदंडादिधारिणः तेश्चेत्तवसनानैवएतेनरक्तवा
२९९ ससः आचारोपिनथैवैषामव्यक्तोब्रह्मवादिनां अव्यक्ताचारवान्नित्यंवुमानेवंव्यवस्थितः अव्यक्त
कृतिरव्यक्त ५ मतिरव्यक्तालिंगकः ज्ञातोयोज्ञैःसमसर्वत्रप्रमत्तइवचक्वचित् सर्वज्ञवत्क्वचिन्माति त्वज्ञवत्सक्तन
हीनवत् वंद्यस्तजवद्देकत्रजडवन्मूकवत्क्वचित् रागाधवत्कचिन्नभाति विरक्तइवचकचित्
असत्तोचरितेसक्तःकचित्समहतामपि अयंमत्रयथवामन्वाह्यसक्तोवावद्धः अतः सद्वृत्तोवा
पिदुर्वृत्तोज्ञैर्ज्ञातुंनशक्यते ब्राह्मणोवाश्वपाकोवायतिर्वाप्यथवागृही निपुणेनापिविज्ञातुं
शक्योवर्णाश्रमादिना दत्तात्रेयोयथापूर्वंरेवापाजलमध्यगः अर्जुनेनतुवित्तेनापिनज्ञातश्चक्र
वर्तिना रक्तांवरधरःश्रीमान्युवासूर्यसमप्रभः पानपात्रकरेबिभ्रत्एकस्मिन्दंडमन्यतः वा
मांगेवामनयनोमदघूर्णितलोचनो वीक्ष्यमाणोमुहुर्वस्त्रवदनवाचासनातने एतेषांपदवीमज्ञा
गच्छन्शीघ्रमधोव्रजेत् ह्ययंजन्मसहस्रातेदुर्लभामानुषैःसदा एतेब्रह्मात्मविज्ञानात्ब्रह्मीभ
तापनीश्वराः पुण्यपापेडभेतीर्त्वावर्ततेपरमेपदे एतेषुयेत्रसंमताःपुरुषाभक्तिसंयुताः तेभ्यः २५५९

स्वसन्नन्तेसर्वंप्रयच्छंतिसुखप्रदं यदातेषुसदाहेषंकुर्वात्मानःप्रकुर्वते तेभ्यस्तेयांतकेसर्वंप्रयच्छंत्यत्र
दुःखदं एवंपुण्यंतथापापंजन्मकोटिशतार्जितं दत्वाफलेनसहितंलोकातीताःसमासते आशांव
राःकचिच्चैतेदुष्कूलवसनाःक्वचित् विण्मूत्रलेपनाःकापिक्वचिच्चंदनचर्चिताः क्वचिद्धसंतिसहः
साःक्वचिद्ध्यायंतिवल्गिताः आस्फोटयंतिधावंतिपिशाचाइवचक्वचित् क्रीडंतिबालकैःसार्धंक
चिद्देतेगतस्पृहाः अकारणंहदंत्येतेकचिल्लोकप्रताडिताः वहाश्चसुखमागत्यगर्जंतिजलदा
इव एवमुन्मत्तवच्चेष्टांकुर्वंतोलोकमोहकाः अनुन्मत्तामहाभागायमानामविलोपकाः तथा
चरेतवैयोगीसतांधर्ममदूषयन्नंगच्छेयुर्नैवसंगतिं एतद्वचनमोलोकाप्रवर्ततेमहाधियः चेष्टासु
विविधास्वत्रसर्वचेष्टाविवर्जिताः यथाज्वलन्महावह्निःसुपक्वमार्द्रंचनिर्दहेत् तथाशुभाशुभं
कर्मतेषांज्ञानाग्निरप्ययं सर्वभक्ष्येयथावाग्निस्तथाकश्चितविमोहितःस्वयंतथाप्रह्वःसनतत
त्वणादेवनश्यति एवंपरमहंसानांवृत्तिमेतामलौकिकी अन्योत्रपरमोहंसःसाक्षात्कारविवर्जि
तःऊर्ध्वनविनाशमायातिदुःखलोकद्वयेपिसः विदुषामेषसंन्यासःस्वयंज्ञातःफलात्मकः क
र्मव्यतानकाप्यत्रविद्यतेफलजन्मनि त्रिसंध्यंनैवचस्नानंनसमाधिश्चविद्यतेयतस्तेषांसदेवा
त्मसमाधिर्ब्रह्मवेदिनो आसीनःसंविशंस्तिष्ठन्भुंजानापर्यटन्पिबन् शयानोब्रह्मविन्नित्यं

ज्ञानापया।
वमन्येदन्।?

श्रा·पु· तिष्ठत्येवसमाहितः देहाभिमानेगलितेविज्ञातेपरमात्मनि यत्रयत्रमनोयातितत्रतत्रसमाधयः श्रा
३.. पंचमाघयावषात्नविधिर्ननिषेधने शिशास्तथैवविद्वषांननिषेधोविधिर्नच निजंदेहंनचाविः
ष्टांशंतनरातेहृदयंहितत् विषमेनैवपश्यंतिकर्मणामनसागिरा उत्फुल्लैर्विविधैस्तद्वलेपनैस्स्रम
समनःसपे नोरमैः सुगंधैरत्नाद्यैश्चापि पूजिताः अप्युत्तमात्रमिमेहर्षंनैवयांतिकदाचन छेदभेदेनघातेहैव
300 नेताडनेपिच भर्त्सनादौविषादंचमनसापिनयांतिते लिंपेयश्चंदनैरेनान्छिंद्यायोपिचवासयं नयो
स्तयोस्वदेहेचसदातेसमबुद्धयः शत्रुर्मित्रमुदासीनःस्वपरश्चनविद्यते तेषांब्रह्मात्मनांनित्यमभे
दमनुपश्यतां नशीतेनापिचोष्णेवापिपासानक्षुधानच शोकमोहादयोनैवनजरामरणादयः ।
मानावमानौद्वावेतौप्रीत्यप्रीतिकरौनृणां तेषामेकाचउक्तनौनैतेषांसमचेतसां एवंतेपरमा
हंसोऽङ्गारानाह्यलौकिकाः फलावस्यामहाभागाविद्वांसःसमदर्शिनः परपंचरितःसर्वंध
र्मोंत्यंततसदुस्वरः कालेचनिपतिर्नैवविपतेकस्यचित्कचित् एवंविरागंसंत्यज्यजातेसर्वत्र
निश्चिते गर्भोपनिषदिप्रोक्तशरीरस्थितिवोधनात् प्रायःसंजायतेसोपिविशुद्धमनसांनृणां
सर्वेषामपिदेहोयंब्रह्मणश्चपुनस्तथा पंचभूतात्मकोनित्यंभौतिकैःसमधिष्ठितः पृथि॰
व्यापस्तथातेजोवायुराकाशमेवच महाभूतानिपंचैवकीर्तितानिमनीषिभिः एतानिकथितो ३..

पंचम

देहः स्थूलः सूक्ष्मश्च देहिनो स्थूलसूक्ष्मस्वरूपेण वर्तमानानि सर्वशः चक्षुःश्रोत्रं तथा घ्राणं रस
नं स्पर्शनं त्वगिति ज्ञानेन्द्रियाणि पंच स्युः पंचकर्मेन्द्रियाण्यपि वागुपस्थौ तथा पायुः करौ पादौ च पंच
मौ अंतःकरणमंत्रोक्तं द्विविधं वेदवादिभिः ज्ञानस्य च क्रियायाश्च देहजं सर्वत्र संस्थितं त्रिपादं तेन र
वे प्राणः धा दशधापि वा प्राणोपानस्तथोदानः समानो व्यान एव च नागः कूर्मश्च कृकलो देवदत्तो ध
नंजयः चतुर्विधं भवेत् ज्ञानं देहजं तेः स्थिते च ननत् हार्दस्य देहपमस्य सर्वेषामपि देहिनो मनबुद्धि
स्तथा चित्तमहंकार इतीरितं सूक्ष्मैर्भूतैः समेतं सूक्ष्मं देहमिदं स्मरेत् स्थूलैर्भूतैस्तथा स्थूलं
देहं वदंत्यपि अध्यात्ममधिदैवं च भेदस्तस्मात् चतुर्विधः सूक्ष्मो हिरण्यगर्भोयमधिदैवं समीरितः
स्थूलस्तथा विराडेष यमानलोकवपुस्थितः अतलं चैव पातालं वितलं सुतलं तथा रसातलं पंचमं
स्थानं तत्र षष्ठं तलातलं महातलं सप्तमं तु पादद्वयमिदं स्मृतं भूर्लोकं जघनं तस्य पुरुषस्य महात्म
नः अंतरिक्षं तथा नाभिः स्वर्गो हृदयमीरितं महर्लोको मुखाद्वीक गलादारभ्य संस्थितः
मुखतो नेत्रपर्यंतं जनलोक इति स्मृतः ललाटे तु तपः प्रोक्तं शिरः सत्यमितीरितं चतुर्दश
नो लोकानामेव स्थाने विराट् स्मृतः आध्यात्मे सूक्ष्मसंज्ञं यत् तेजसं तत् प्रकीर्तितं विश्व
स्थूलसमष्टिमात्मानां समधिष्ठितं अधिभूते च देहस्य देहमध्यात्मव्यवस्थितं अध्यात्मम

आ॰उ॰ मधिभूतंचमिलित्वास्थिरजंगमं चतुर्विधाभवन्त्येतेदेहाःसर्वशरीरिणां उद्भिज्जास्थावराणांस्युःके
षांचिच्चशरीरिणां देवादीनांनयेयोनिंप्रामापुण्याधिकाजनाः स्वेदजाश्चापिविज्ञेयामत्कुणाद्याः
३॰॰१ सहस्रशः अंडजास्तेपिकेचित्तुकेचिदत्रजलेचराः अंडजाः पक्षिणस्तद्वत्सर्पाद्याश्चविलेश॰
याः जरायुजामानुष्याद्याः प्रसिद्धाः सर्वदेहिनां तेषुसर्वेषुदेहेषुपृथिवीधारणेस्मृता आपःसं॰
३०१ क्लेदनेनतद्वत्तेजः पाकादिकर्मणि संयोगेचैववायुराकाशाईरितः अवकाशेसदाहेतुश्चक्षुरूपग्र
हेतया श्रोत्रंशब्दग्रहेतद्वत्घ्राणंगंधग्रहेतया स्पर्शग्रहेत्वगुद्दिष्टारसनंतुरसग्रहे वक्तृत्वेवागुग्र
वेहृतौहस्तावादानकर्मणि प्रजोत्पादनयानेदुपस्थः परिकीर्तितः पायुर्विसर्गेसंप्रोक्तः पादौ॰
गत्यांसमीरितौ प्राणाद्याःकथितादेहेसर्वेविविधकर्मणि जीवनेमरणेतद्वद्धेतवःसर्वदेहिनां
संशयादेर्भवेद्धेतुर्मंतव्यस्यमनःसदा अहंकर्तव्यहेतुःस्यादहंकारोवपुस्थितः चित्तसामान्य
विज्ञानेबुद्धिःसर्वत्रनिश्चये कठिनापृथिवीज्ञेयागंधादिगुणसंयुता द्रवास्तद्वद्युताश्चापोर
सादिगुणसंयुताः उष्णप्रकाशवत्तेजोरूपादिगुणसंयुतं क्रियावान्कथितोवायुःस्पर्शग
णगुणोदितः नभःसुषिरमुद्दिष्टंशब्दैकगुणमेवतत् एकद्वित्रिचतुःपंचगुणायुक्ताउदाहृ
ताः विषयाःश्रोत्रमुख्यानांखानिलानलवार्भुवः हस्तादीनांतुरावस्तुविषयानियतिंविना मे ३॰॰१

तभौतिकमेतस्यास्सूक्ष्मदेहोशारीरिणां अधिदैवादिभिन्नानामतिसूक्ष्मतममदा सूक्ष्मतास्यात्तु विशे
षायंचीकरणवर्जनात् पंचीकरणमप्येवंभूतानामिहकीर्तितं एकैकं हि महाभूतं पंचधा प्रविभज्य
च पंचमं पंचमं भागं सर्वेषां पंचधा पुनः विभज्यैकैकमेतेषां सर्वेषामप्ययेदिह एकविंशति सं
ख्याकाभागा एवं भवंति ते एकैकस्य स्वकीयस्य चतुर्णामपि चेतरे चत्वारश्च भवंत्यस्माद्यधिकास्तु
भूतानां च तत एव हि धिक्याद्दावन्यत्वबुद्धिर्न जायते पंचीकृतेपि वाह्येस्मिन्स्वभागेष्वपतःस्थिते पंचविंशा
यतोभागोभूतेभूतांतरैः कृतः भूतांतराणि तान्यतोहृशीतेन परेत्वहि अथ पंचीकृतो देहःस्थ
लोरूपमनेकधा दधाति मध्यात सूक्ष्मरसादीनपि देहिनो शुक्लं रक्तं तथा कृष्णं धूम्रं पीतं त
थैव च कपिलं वभ्रुषं शुक्लं रूपमस्मिन् हि वर्तते स्पर्शाश्च मृदुलाश्च कठिना मध्यमा॥
अपि उष्णाः शीताः द्वयेतद्वदन्ये सशीतला अपि गंधाः सुरभयस्तद्वत् प्रकृत्यापेत्वयोगतः॥
भवंति प्रकटादेहे भूरिपुण्यविपाकतः दुर्गंधानित्यमेवैते लभ्यंते वदनादिगाः रसाश्च ष
ड्विधास्तद्वदेते सर्वशरीरगाः कटुतीक्ष्णाकषायाख्याः लवणाम्लमधुरा अपि शब्दाश्च विविधा एते
प्राणिनां वपुषि स्थिताः निषादर्षभगांधारषड्जमध्यमधैवताः पंचमश्चेति संप्रोक्ता
ध्वनिरूपा मनीषिभिः सुगंधा एव तेलभ्याः पुण्यपुंजविपाकतः अंतर्देहे योगहशांगायकानां॥

मज्जाशुक्राणिधातवः सप्तदंतास्तथैवोक्ता द्वात्रिंशत्सस्थि ।

श्रा॰सु॰ द्विपमरवे वर्णात्मकाश्च वहुशो वक्रस्थस्था भवंति ये तु गलस्थाश्च मेदोस्थिभेदतः आपादमस्तकं तद्वत्
त्वचिस्नायोजरशाने मर्माणि ये स्मृतानि गच्छंति नैः शस्त्रादिनायुमात् व्याधिवाङ्ःसहस्राणि वैयाज्ञानेनजि॰
३.०२ सर्वदा अशीत्यभ्यधिकेनत्वच्छन्ते देहे च संधयः अस्थ्नानवनाडीनां स्थूलानां सुःशतानि वै केशरीरे
मांसं तथैव सुरशीतिशतकोटयः जिह्वावक्त्रस्थिता न्हणां पलानि द्वादशेरिता कंठनालो हृदय॰
302 स्य रक्तोत्पलनिभस्य हि पलान्यष्टौ तु विज्ञेयं पद्मं हार्दं सदैव तत् पित्तं प्रस्थमितं प्रायो हृदये संस्थि॰ तं॰हि॰ ५
तत् श्लेष्मणो गलसंस्थस्य देहे प्रस्थं च तद्द्वये सर्वांगसंश्रयं शुक्रं कंठहृदि च मूर्धनि विशेष॰
तः स्थितं यत्तु मथनेन विनिःस्रवेत् प्रस्थस्य च चतुर्थांशेन स्यद्देहे वदंति हि मेदस्तथापि संप्रो॰
क्तं प्रस्थं हि परिमाणतः मूत्रं चैव पुरीषं च बस्तिसंग्रहणीगतं अन्नपानग्रहस्यात्र सदाह्रासे
न चानिशं वर्द्धते दीयते यस्मात् तस्मान्नियतिवर्जितं पिप्पलादेन कथितं मुनिना सर्ववेदिना
शरीरं सर्वजंतूनां षण्णवत्यंगुलं स्मृतं स्वांगुलैः केशपर्यंतं पादांतावधि देहिनः देहे द्वात्रिंश
दस्थीनि वंशास्थ्नः पार्श्वयोर्द्वयोः द्वासप्ततिसहस्राणि नाडीनामपि संस्थितः एकैकस्यास्तु ना
डीनां शतमेकोत्तरं ह्रियाः शाखाप्रशाखा समाम्नाताः प्रतिशाखाश्च मांसस्मृताः तासां सर्वं च देहे॰
स्मिन् व्याप्तिरापादमस्तकं शरीराद्धिकः प्राणो द्वादशांगुलमानतः वह्निर्नासिकयापाति ३.०२

तस्मात्प्राणःप्रेरितः चत्वारिंशत्षडेवाष्टांगुलानि पदाग्रतः केशाग्राच्चाभवन्मध्यं शरीरस्य नृणामिह
देहमध्ये शिखिस्थानं तप्तजांबूनदप्रभं चतुरस्रं शिरोनेत्रे तिष्ठत्याचंद्रमंडले चतुरस्रे स्थिते तेजः श
पु शिखिसंज्ञं त्रिकोणगं अग्निस्तत्र सदाज्वलन् जीवतो न जहाति च गुदात्तु द्व्यंगुलादूर्ध्वं मेढ्राद्व्यंगुलतो
नववाकाम्यथोपुत्रेषणायाइतिवाजयेत् एतदेतेनसङ्कीर्तनयाहइतित्रयतःपुमान् त्रिंशन्नयस्तमेपद्ये

वेमेधममध्योत्तरस्वैरेः आतुरस्यतुसंन्यासेप्रेषमात्रेहिकेवले नयाह्वादिनचान्यंस्यानजलमध्यो

दिसर्पणे प्रेषवक्तुमशक्तश्चेतवाचासौमनसैवहि प्रेषंकुर्यात्स्वयंधीरोमरणासमुपस्थिते आ

तुराणांतुसंन्यासेनविधिर्नैवचक्रिया मानसाह्वार्चिकाह्वापिप्रेषाद्देवात्रजायते ततंत्यजेद्दियोः

विप्रःकृत्वासंन्यासमात्मवान् कालांतरेयवासयोब्रह्मलोकेसगच्छति संन्यस्तमितियोब्रूयात्प्रा

णैःकंठगतैरपि सहर्षमंडलेभित्वाब्रह्मलोकमहीयते ब्रह्मणामरणेतेनब्रह्मणासहधर्मवा

न् महाभूतलयेप्राप्तेपरंब्रह्माधिगच्छति त्रिंशत्परान्त्रिंशदपरान्त्रिंशच्चपरतःपरान् सद्यःसं

न्यसनादेवनरकात्त्रायतेपितॄन् कुलानांचशतेपूर्वेऽप्यपरेचशतत्रयं एतस्मात्सङ्कटेलोकेसंन्या

सात्स्वकुलप्रियः न्यासस्त्यागइतिप्रोक्तःसम्यङ्न्यस्तचेदृश सर्वथासर्वदासर्वंसर्वत्रत्यजनं

स्मृतं नञ्ञमाख्यपरेहंसेजघन्यमपरंत्वहि परोहंसइतिज्ञानात्द्विजस्त्वभ्नियतेयदि पुत्राद्यैर

थवातस्यसंस्कारःपरिकीर्त्यते संपाटयेत्रथेचित्रेविमानेचापिनिर्मले आंदोलिकाचशिबिका

वाविस्तीर्णमण्डलश्चैव वादित्रनृत्यघोषेचजयशब्दंचकारयेत् महादेवस्यविष्णोर्वाभक्त्याय

स्तस्यमन्त्रसेव स्नाताःकुङ्कुमलवमनात्तदुत्तचंदनचर्चिताः तांबूलवदनाःसर्वेस्त्रियाणांहर्षमागताः

धूपयेच्चमकुर्मधुः नीराजतेः सकर्पूरैः ४

आ॰ पु॰ हरिद्राचूर्णकुंकुमाद्यैः फलैर्नानाविधैरपि सुगंधैः सुमनःसंघैरन्योन्यकरसंस्थितैः वसंतोत्सववत् कु
३२२ र्युरुत्सवं विभवे सति गृहाश्च राजमार्गाश्च सर्वतः परिमार्जिताः सिक्ताश्चंदनकर्पूरवारिनिर्गतपां
शवः पंचामृतेन तद्देहं स्नापयेत् शिववित्सुवत् पुष्पैर्जलैः सुगंधैश्च लेपयेच्चंदनादिभिः अलं
कुर्यात्तु मालाभिः सर्वतः प्रतिमामिव चंदनागुरुकर्पूरैर्धूपैश्च नीराजयेदपि सत्याश्च सर्वसंप्रोक्ता
यने सम्यगलंकृते देववद्राजवच्चैनं वेदघोषैश्च संयुते निःसारयेयुः संस्थानात्तु वनादिस्थान
कं प्रति पुण्यहृद्ये वने गत्वा निर्जने वा वनस्पतौ देवालये यवा गोष्ठे महानद्यास्तटे यवा अन्यत्र वा
शुभे देशे मलास्यादिविवर्जिते पुंप्रमाणं खनेद्भूमिं प्रणवत्वर्गलीकृतो पठेयुः खनितास्य
व्याहृतीरसकृत्ततः सप्तव्याहृतिभिः खातं संप्रोक्ष्याथ द्विजोत्तमः दर्भासनं प्रकुर्वीत प्रणवेन
न भुवस्तले सावित्र्यातत्र देहं प्रक्षाल्य मलवर्जितं पौरुषेणापि सूक्तेन स्नापयेत् विष्णुबुद्धि
तः गंधमाल्यादिभिश्चैव तद्वलं कुर्याद्यथापुरा विष्णुर्हव्यं रक्षस्वेति मंत्रमुच्चार्य निक्षिपेत्
खाते तस्मिन् ततो दंडमर्पयेद्दक्षिणे करे त्रिधाकृत्वा भवेद्दंडं आत्तस्य न विद्यते संपाद्यंतत
दास्ययोदयात्संन्यासधर्मवित् अमनामत्रतो विद्वान् इदं विष्णुर्विचक्रमे इमं इत्यादिकमं
त्रं जपेत् हृदयदेशतः ब्रह्मध्ये पौरुषं सूक्तं ब्रह्मजज्ञानमादि मूर्धनि भूमिर्भूम्निमगादित्यमंत्र

तोहंठमघमना भियातमर्द्धनिमध्येचमेधावीब्राह्मणोत्तमः उच्चारयंतिॐकारंव्याहृतिस्त्रद्विजोत्त
माः अवटंपरयेपुस्तेपापाणोस्त्रमदाहठे एवम्मृगालादयोयहतभक्तपेयुर्नततथा कुर्युरेवनचे
देवकुर्भिक्त्वाटिपजापते सन्यासिनोनकोप्येषसंस्कारःपरिकीर्तितः कन्हणामनुमुनायस्मात्तभ
वेदभ्युदयःसदा मनुवायोप्पकरणेनततस्तेथवसंस्मृतः देहःपरमहंसस्यदेयःछित्वात्रखंड
शः भत्नेभ्यवृत्तिचेढ्ढेतिविरक्तेनपरेनथा ततःपरमहंसस्यमरणान्तद्विकारणे अन्येषांचव
र्णिनांतेनमरणेयःसमर्वदा कुटिकाचदयोदासाःमरणेयाश्चवाद्विजैः राहापरमहंसस्य
नैवकार्यःकथंचन अस्मिन्दग्धेमदग्यासुराशिषःप्राणिसंश्रयाः भक्तितेभक्तितालहवनस्मा
त्तेश्वरयेत्सदा अग्निनाग्निरितिप्रोच्यमस्यांतकुतिचापरे पठनमंत्रेद्विसंशरणंस्वात्तेतस्मिन्द्विजो
त्तमः प्रहृष्टवदनाःसर्वेशोकलेशविवर्जिताः विवाहायकत्सवेयहत्ततदेवव्यवस्थिताः कु
र्युःप्रदक्षिणंजहतनमस्काराश्चशक्तितः अवटस्योपरिस्थाप्यदेवालयमथापिवा अश्वत्थ
वावटंवापिशास्यचान्यवनस्पति बेल्ववीमप्रतिमांतत्रलिंगंवाशैवमेवहि आदित्यंवागणे
शंवाभवानींवाप्रियंतथा प्रतिष्ठाप्यचमज्जांचतत्रकुर्युःमहाधिपः किंबहूक्तातथाकुर्यु
र्यथाकालांतरेपिच मलास्याटिपतेनास्यमुपरिष्ठान्नकथंचन प्रेतसदर्शनात्स्पर्शाद्धुद्विर्याजा

श्रा·पु·
३२४
324

यतेन्यूणां नतां कुर्युः परे विप्राः स्पर्शदर्शनसम्भवं ज्ञात्वा स्नानं च कुर्वीरन् शुचित्वनिवारणं परं तत्स्ना
न संभूत तीर्थं तत्तुल्यं मनीषिणः कुर्युर्वाप्यथवा नैव स्नानं स्वेच्छावशादिह प्राणनिर्गमनादूर्ध्वं प्रति
मा वैष्णवी तस्मा देहः परमहंसस्य जीवन् विष्णुरूपः स्वयं अत एव पुराणज्ञा एवमाहुर्मनीषिणः ।
वैष्णवी प्रतिमा दृष्ट्वा यतिं दृष्ट्वैव दण्डिनं प्रणिपातमकुर्वाणो नरकं प्रतिपद्यते दुर्वृत्तो वा सुवृत्तो ।
वा मूर्खः पण्डित एव वा काषायदण्डमात्रेण यतिः पूज्यो द्विजैः सदा ब्रह्मा विष्णुश्च रुद्रश्च शक्रो
लोकपसंयुतः वस्वाद्याश्च गणाः सर्वे यतिदेहे वसन्ति हि पूजिते पूजिता याते सर्व एव सरोत्त
माः भवन्ति च तिरस्कारात् सर्वेऽपि च तिरस्कृताः भिक्षुर्यत्र च तत्रापि विष्णुरूपधरो हरिः नित्य
तिष्ठति सर्वात्मा स्वदेहे स्वचक्रधृक् यत्किंचित् क्रियते ह्यस्य जनैर्वै तैः शुभाशुभं दीयते च वा
त्रदानादि मदयान्तु रूपोत्तमे यतीनां च गुरुः शास्ता शास्ता राजाऽन्तरात्मना इह प्रच्छन्नपापानां ।
शास्ता वैवस्वतो यमः एवं विज्ञाय सततं कर्मणा मनसा गिरा अमङ्गलं यथा पापं कुर्युः पुण्य ।
र्थिनो जनाः यतिमात्रस्य किं भूयः परहंसस्य सर्वदा जीवतोऽपि मृतस्यात्र स्वयं ब्रह्मि मभीप्सताः त
तोऽस्य मरणे न स्यात् नाशौचं नोदकक्रिया न वृत्तप्राशने ज्यातिः स्पर्शनादि कदाचन पदे पदे
श्वमेधस्य फलेन दहनेऽभवेत् स्पर्शने दर्शने विप्राः स्पर्शदर्शनसंभव यतीनां परहंसानाम्

२७

नमसा वचसापि च प्रेषे स्यात् खननं त्वेनत् अन्येषां दहनं भवेत् सर्वकर्मनिवृत्तस्य परहंसस्य सर्वदा यतेर्न द
हनं कार्यं नाशौचं नोदकक्रिया येवं हि ते महात्मानः इष्टाचैव च हर्षितः अश्वमेधफलं तेषां द्विजानां
स्यात्तत्क्षणात्क्षणे अनुगच्छेति ये दाने वहति च खननेति च श्रयंति च ते सर्वे सदा स्नाताः प्रकीर्तिताः ।
यतीनां नैव संस्कारो नैव पिंडोदकक्रिया अहन्येकादशे प्राप्ते पुत्रः कुर्याद्दिवार्वणं विष्णुनामसमु
च्चार्य स्वपितुः स्नेहवर्जितः संकल्पविधिना यद्वत् विवाहादि यथा भवेत्तथा पुत्रादन्ये प्रकुर्वीरन् ज्ञात
यो ज्ञातयोपि वा नारायणबलिं सर्वे पुरुषोत्तमतुष्टये द्वादशे दिवसे प्राप्ते पुत्रोपि च तथैव सः पार्व
णं प्रतिदायाद्या ये चान्ये च द्विजातयः कृत्वा विष्णोर्महापूजां पायसं च निवेदयेत् भूर्भुवः स्वरिति
प्रोक्ते जुहुयात् पायसं पुनः संस्कृतं त्वघनैवेद्यं ब्राह्मणेषु निवेदयेत् यतीन् गृहस्थान् साधून्वा गृही
त्वा द्वादशावरान् आराध्य गंधपुष्पाद्यैर्मंत्रैर्द्वादशनामभिः संपूज्य भोजयित्वा च वासांसि विविधा
नि च यतिपात्रं प्रदेयानि गृहिभ्यो दक्षिणामपि त्रयोदशे पतीं कृत्वा मात्माज्ञे विजितेंद्रियं संपा
दयेद् भावे हि यतीनामत्र सर्वथा एकोपि यदि लभेत यतिः परमहंसकः तदा गृहस्थं धर्मज्ञं उ
त्तमं सर्वसंमतं विष्णुबुध्या समभ्यर्च्य पाययेन्मविधानतः दद्यात् पुरुषसूक्तेन धूपादिकमनुक्रमा
त् वस्त्रालंकरणादीनि यथाशक्त्या तथास्तिकः उच्छिष्टसन्निधौ दर्भान्नास्तीर्याग्नेर्मनोरमैः चतुर्वि

धेभ्यो भूतेभ्यो वलिं व्याहृतिभिर्हरेत् प्रत्येकं त्रिरुक्तिभिः पश्चात् मिलिताभिः स्वधा पुनः विभवाभावतो ह्य
त्रयतयस्त्र त्रयोदश विप्रा वा विभवे स्याप्यानात्र किंचिद्विधीयते यावन्तो वसनादीनां दाने शक्तिर्हि वि
द्यते तावन्तः समसंख्या वा भोज्याः प्रथममेव हि अनंतानभोजयेत् पश्चात् स्पष्टैरन्नैस्तु सादरं सर्वभो
ज्यैर्यथाशक्ति दद्यात् देवात्र दक्षिणाः एवं यः कुरुते विद्वान् नारायणवलिं द्विजः अभीष्टमर्थमाप्नोति
जीवन्नत्र न संशयः विष्णुलोकं स गच्छेत स्वकीयैः पूर्वजैः सह एवं परमहंसस्य संस्कारस्तु मयेरि
तः आतुरस्य प्रसंगेन प्रोक्तं तन्मतः शृणु कुटीचको वहूदको हंसो वापि यदा भवेत् यतिः प
रमहंसाख्यं श्राद्धहोमादिकं तदा न कुर्यादातुरो यद्वत् प्रैषमात्रात् प्रपूरयेत् संन्यासं न ह्यदृतेपि ह
र्षयुः सदैव हि प्रैषमात्रेण विद्वांसः परं वैराग्यमाश्रिताः अभयं सर्वभूतेभ्यो मत्तः स्वाहेति कीर्तयेत् ।
मंत्रमथोत्तमैः शब्दैः प्रत्येकं व्याहृतित्रयात् त्रिः कृत्वाञ्जलिस्तु संपूर्य स्वांजलिं ह्युत्तरां दिशं प्राचीं वा प्र
जेद्विद्वान् यथाजातवपुर्नरः यज्ञोपवीतं सशिखं मन्त्रैस्तोयांजलिं स्थितं अप्सु भूमौ विसृजेद्वा त
तो गच्छेद्दण्डसंयुतः नग्नो भूत्वा विरक्तो वा गृहमेकं परिग्रहेत् पंचभूतात्मके दण्डं त्रिदण्डं वा परिग्र
हेत् ब्रह्मचर्याद्गृहाद्वापि वनाद्वा प्रव्रजेद्द्विजः यज्ञोपवीतं पूर्वेण दंडेन सह हंसकः भूः स्वाहे
ति च मंत्रेण जुहुयादप्सु सादरं स्त्रियो वापि वेश्यो वा संन्यसेत्तु वा यदा तदा अनामन्त्र्य व्रजेद्व

दंडादिपरिवर्जितः जडोन्मत्तपिशाचांतोनग्नोविद्वानिवस्वयं विद्वानवाप्ययवाविद्वानपरंवैराग्यमाश्रितः ना
नायोगाश्रमेतत्रैयेलिंगधारणमिष्यते वेत्सवंधारयेल्लिंगंविप्रस्तुवनचापरः प्रार्थयेनापिनाध्वर्युरे
नेयातेदिगंवरं कौपीनादिनग्रहीयादध्वर्युप्रार्थनांविना संन्यासीततएवस्यात्अनाहृजिह्वयोर
पि क्षत्रियोवापिवैश्योवासंन्यासीऋषभादिवत वीरमार्गेणदेहंस्वंत्यजेदेवाविचारयन् अभीतः
सर्वतोगच्छत्शवाग्निजलदष्ट्रितः आनिपातेशरीरस्यवीरमार्गोयमीरितः वुद्धिःसर्वंजलेचवह्नौवा
पिवपुःक्षिपेत् अन्नोदकपरित्यागात् अथवासततेगतेः एकस्यामेवदिशपात्मदेहंधीरःपरित्य
जेत् आहादिश्रेषपर्यंतमक्षत्वामननैसेवहि संकल्पपरमंप्राप्तोविरागंसर्वपूर्णतः स्त्रीस्वशूद्रादिरपिप्रा
यःकुर्यात्स्त्यागंतथासदा कुर्युरभ्यागतेतेनुसदासर्वंविदेहिन स्वदेहनाशहेतत्रकेकिमपेत्रद्विजातयः
यदाविप्रःपरोहंसोभूयात्नग्रउदङ्मुखः शिखायज्ञोपवीतादिरहितःपरितोव्रजेत् अध्वर्युस्ततो
गत्वादंडवत्प्रणिपत्यतं प्रार्थयेत्तंकराभ्यांतत्पादौधृत्वामर्इमहः वेदवित्भगवान्विप्रःसर्वदेव
वपुर्यतः ततोवपुरिदंत्यक्तुंनत्वमर्हसिधर्मवित् अपितेनवपुर्विप्रकिमुलोकस्यतद्धृतः परिकी
र्येकेयवितेविनाशायसिवुद्धिमान् आत्मनःश्रवणंकृत्वामननंध्यानमेवच साक्षात्कारंहिसंपाद्यप
श्चात्कृतयघसितं गुरुस्त्वयाचिरंकालंसेवितोव्रह्मवित्तमः अनुज्ञापितवानमांसवहुशोयिनिवार

आ॰
पु॰
३२८
३२८

णं गर्वाज्ञां तत एव त्वं ऋर्णात्मज्ञानहेतुकां इत्यादिवचनैर्भरिमं आर्य्यं द्विजसत्तमः इत्यात् दंडयादिकं त
स्मै तिष्ठन् तिष्ठेति कीर्तयन् दत्तं दंडं ऋजुं सौम्यं सत्वचं वैणवं द्विजः इंद्रस्योत्यादिमंत्रेण गृहीत्वा प्रण
वेन तु दोरकौपीनवासांसि प्रणम्य गुरुमादरात् सेवेत तं यथान्यायं आत्मविद्यां लभते अधिकार
प्रसंगात्ते संन्यासविधिरितः एवं परमहंसस्य स्वरूपं वक्ष्यामि अधुना दधानो वैणवं दंडं सौम्यं सर्वांगि लक्ष
णं शिखायज्ञोपवीताभ्यां रहितो विकसन्मुखः कौपीनयुगलं कंथां तद्वत् शीतनिवारणीं भिक्षाटनाय
शाटीं वस्त्रखंडं वापि खंडितं अलाबुं दारुपात्रं वा वैणवं मृन्मयं च वा वहन् कुर्वन् शौचादिकार्या
र्थं कार्यवर्जितः न पाणिपादचपलो न वाग्भेदादिचापलः गच्छन् विलोकयेद् भूमिं युगमात्रं पुरः सदा
आसीनो नासिकांतं तु पुस्तकं वा विलोकयेत् शून्यागारे देवगृहे वल्मीके तृणकूटके वृक्षमूले कु
लालस्य शालायामग्निहोत्रके पुलिनेषु नदीनां वा गिरीणां कंदरादिषु कोटरेषु तरूणां वा स्थंडिले
निष्कुटे पि वा निवसन् निरतो नित्यं सदा शौचपरायणः भिक्षार्थं च व्रजेत् ग्रामं प्रीतिमान् निर्जने सदा
प्रादक्षिण्येन भिक्षायां गृहान् संव्रजेत् सदा उदरं वापि पाणिं वा पात्रं कृत्वा यथापरे यथौषधं तथैवान्नम
श्नात्येष सर्वस्य न निंदति न च स्तौति कमप्येष कदाचन अलाभे वापि लाभे वा भिक्षायाः एकरूपभाक् अ॑ समप्रोक्तेपि
सम्पन्नो विकारं नाधिगच्छति सुखादिषु समो नित्यं उपकार्यपकारिणोः न स्थूलो न कृशश्चायमाहा

रेणकविंद्रवेन केशश्मश्रुनखानां च कृन्तेद्वपनेसदा ऋतुसंधिषुवर्षासुकृन्तेद्वानवापिसः आ
षाढ्यांपौर्णमास्यां च कृन्तेव्याससज्जनं कृष्णद्वैपायनंपैलवैशंपायननामकं जैमिनिंचसुमंतं
चस्रजयेत्व्यासपंचकं कृष्णंचवासुदेवंचसंकर्षणमथापरं प्रद्युम्नमनिरुद्धंचस्रजयेत्कृष्णपंच
कं शंकरंविष्णुपंचपद्मनाभंतथैवच हस्तामलकनामानंतोटकाख्यंचपंचकं आचार्यपंचकंप्रायःस्र
जयेत्शंकरेमते गुरुंचपरमंतद्वत्आत्मनःपरमेष्ठिनं गोविंदंगौडनामानंस्रजयेत्गुरुपंचकं आ
त्मानंमंतरात्मानंज्ञानात्मानंपरात्मकं आनंदात्मानमित्येतत्स्रजयेदात्मपंचकं आग्नेयादिविदिक्
स्थानस्रजयेत्चतुरोसमन् गणनाथंतथादुर्गांदेवींचैवसरस्वती क्षेत्रपालंमहेशानंसर्वारिष्ट
विनाशकान् आत्माचार्यगुरुव्यासपंचकानिचतुष्टये सर्वादीनांदिशांमध्येकथितंकृष्णपंचकं
सनंदनंचसनकंकुमारंचसुजातकं सनत्संदादिकंकृष्णपंचकात्परितोचयेत् नरनारायणौकृष्ण
पंचकात्पुरतःस्थितौ ब्रह्मादित्रयमस्यैवपृष्ठतस्तुसमर्चयेत शेषान्देवान्मुनीन्सर्वान्यथायोगंप्रस्र
जयेत् नरनारायणाग्रस्थंनारदंमुनिसत्तमं एवंसंपूज्य[illegible]वसन्तिमासौसौचतुरोपिवा वर्षाकालेमही
वांस्थिरजंगमदेहिभिः निरंतरंसमाकीर्णांलक्षकोट्यादिसंख्यया तेषांरक्षार्थमेषोपिवसत्येकत्र
सर्वदा नहिंसतिकमप्येषस्थिरजंगमदेहिनां वदत्यसत्यंनैवायंनचचौर्यंकरोतिसः तृणस्यापिच

आ॰पु॰ ३२० प्रा॰ण॰२ नारीषुग्राम्यधर्मेणपाजिन कामेनपरिग्रहीयात्भवेद्वापरिग्रहः तयासामपिकीचेष्टांनकुर्यात्मलय
न्नच नियमोस्ययथाशक्तिदेवनारायणादिकान्कुर्वाणःशोधंचस्वात्मनोवसरेमति वेदान्तश्रवणंस्ना
नेत्रिसंध्यादौतथैवच गुरुभक्तियथाप्राह्वर्षाकालातिरेकतः एकत्रचवसेत्रैवतत्ररागादिविवर्जितःअ
327 लाभेनविषादीस्यात्लाभश्चैनंनहर्षयेत् समःशत्रौचमित्रेचतथामानापमानयोः आत्मवत्सर्वभूता
नोकर्मणामनसागिरा अनुकूलेहिकुर्वाणःप्रतिकूलेनचाचरेत् हिरण्यादीनिवस्त्रानिवधःनहन्या
नोरमाः विश्वात्मनसानित्यंभावयेत्संस्मरेच्चवा विण्मूत्रसम्भवोदेहोमलभांडोविनिर्मितः कामाय
नेकरोगाणांसर्वावस्थास्वनश्वरः किमर्थंवहसेगर्वंमस्यदेहस्यसर्वदा अहंब्रह्मेतिवाक्यार्थस्एवा
नोगुरुवाक्यतः मननेचनयाध्यानेकुर्यादात्मावबोधनं यावत्साक्षात्कारोनोमायंज्ञायतेतेनसर्वगः ओं
कारमपितावज्जपेत्शक्त्यनुसारतः प्राणावायविरोधेनमंत्रानन्यांश्चसंत्यजेत् आरोहस्त्रैवयाः
नेचनचकिंचित्परिग्रहेत् यावत्तानभवेद्देहत्यागोत्रवसनादिना स्वीकुर्वीतावदेवायंनाधिकंतुक
दाचन संध्यात्रयेसमाधिस्थोनकुर्यात्सविनाशनं जीवात्मनोरिहैक्यैनस्वात्मनोब्रह्मबोधनात् क
स्यापिनैवकुर्वीतसद्दत्तदोषकीर्तनं आत्मनोधिकवुध्यावामानंसर्वविनाशनं कर्मणामनसा
वाचाविद्याधर्मस्वयंकृतं परेभ्यःप्रकटंनैवकुर्याद्दंभादिकंसदा ऊहज्ञानेनकस्यापिपक्षंचैवन

दूषयेत् अभिलाषं च कुत्रापि सर्वे कुर्यान्न धीयतः दुःखे द्वेषं च तद्वत्तन्न कुर्याद्विंसासाधने मैथुनेच्छां चैव
वायं कुर्यात्स्वप्नेपि कुत्रचित् कर्मणा मनसा वाचा भूतद्रोहं कदापि न द्वेषात्ततः स्वर्णादिनगृह्णीया
त्कदाचन अनात्मभूते देहादावात्मबुद्धिं च वर्जयेत् सुखप्राप्तौ प्रहर्षं च वर्जयेत्सर्वदा यतिः दुःख
प्राप्तौ विषादं न जजेत्सर्वं मदीरिते च्छूद्राणामसहिष्णुत्वं न कुर्यात् देहिनामिह अहंमानं च देहे स्व
ममत्वं वसनादिषु नैव कुर्वीत मेधावी त्वेम भिक्षुर्द्विजात्मनः अनृतं वचनं तद्वन्मानं संविष
येरपि लोकरंजनमख्यांश्च त्यजेत्सर्वात्मना यतिः विण्मूत्रकूणपैस्तुल्यं शरीरं स्वं विलोकयत्
नस्तुतिर्न नमस्कारो निःस्वधाकार एव च चलाचलनिकेतस्तु यतिर्यादृच्छिको भवेत् न चाहं न प्रकु
र्वीत न कस्यापि विवर्जनं मंत्रांश्च न जपेत्तैव ध्यानं कुर्वीत कस्यचित् आत्मनो व्यतिरिक्तस्य नापि
चोपासनं यतिः लब्धं न स्यान किंचित्स्यात् व्यापारेषु यतेः सदा अलब्धं च न किंचित्तु बालवत्स
मदर्शिनः आत्मनो व्यतिरिक्तेन वेदनेनाप्यभेदवत् प्रयोजनं किमस्य विद्यते समदर्शिनः अहं त्वम
देमित्यादिभेदोप्यस्य न विद्यते सर्वेषामात्मभूते यत् आश्रयेण विवर्जितं ब्रह्म तत्तन स्थितिर्हेतुः
स्यात् अस्य नित्यं महात्मनः स्वर्णादीनि वस्तूनि स्वर्णं च विशेषतः एतानि न स्पृशेन्न कुर्यान्न च ग्रहं पोत्नैवपा
स्पर्शनात्पुल्कसस्तस्य चंडालो दर्शनादपि आत्महा च भवेद्देवनत्परिग्रहतः सदा आत्मन्यग्रहते सर्वेनिह

श्री·पु·
३२८
328
एति

तस्माच्चराचरं सर्वं तपोयतः सूत्रात्मा सर्वेषामिह देहिनां शांतसर्वेंद्रियः शांतमानसो वृतसूत्रः उ
पवीतं शिखां तद्वत् ज्ञानमेव दधीत वै यस्माद्ब्रह्मोपनिषदि स्मृयतेन्यत्र चेदृशं इदं स्यादेवताः
सर्वाः हृदि स्प्राणाः प्रतिष्ठतः हृदि ज्योतिः परं तद्वत् त्रिवृत्सूत्रमिदं स्मृतं यज्ञोपवीतं चैतन्यं
हृदि तिष्ठन्नतः सा शिखैव यन्तेह कृत्वा वहिः सूत्रं त्यजेद्बुधः यदक्षरं परं ब्रह्म तत्सूत्रमिति धार
येत् सूचनात्सूत्रमित्याहुः सूत्रं नाम परं पदं तत्सूत्रं विदितं येन स विप्रो वेदपारगः येन सर्वमिदं
प्रोतं सूत्रे मणिगणा इव तत्सूत्रं धारयेद्योगी योगवित्तत्त्वदर्शिमान् वहिः सूत्रं त्यजेत् विद्वान् यो
गमुत्तममास्थितः ब्रह्मभावमिदं सूत्रं धारयेद्यः सचेतनः धारणात्तस्य सूत्रस्य नोच्छिष्टो नाशुचि
र्भवेत् सूत्रमंतर्गतं येषां ज्ञानयज्ञोपवीतिनां ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते अग्नेरिव शि
खा नान्या यस्य ज्ञानमयी शिखा स शिखीत्युच्यते विद्वान् नेतरे केशधारिणः कर्मण्यधिकृता ये वै
दिके ब्राह्मणादयः तैर्विधार्यमिदं सूत्रं क्रियांगं तद्धि वै स्मृतं शिखा ज्ञानमयी यस्य ह्युपवीतं च
तन्मयं ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः इदं यज्ञोपवीतं तु परमं यत्परायणं सर्वदा विधृतं
येन विदुषा स्वात्मबोधतः स विद्वानुपवीती स्यात् यज्ञो यज्ञस्य देहिनां सन्न्यासे पि कृते नैतद्धृतं विधृतं तेन वै
पि च दंडेनैव च दंडित्वं सर्वं ज्ञानेन विना भवेत् यस्मात्परमहंसाख्यो स्मृतिरेव जगौ हि सा ज्ञानदंडो धृतो

येन एकं दृष्टीसदुच्यते काष्ठदंडो धृतो येन सर्वाशी ज्ञानवर्जितः स याति नरकान् घोरान् महारौरवसंज्ञकान्
यस्मादेवं ततो ज्ञानं कर्तव्यं सदात्मना आत्मनो ब्रह्मणो येन भेदधीर्नैव जायते आत्मनो ब्रह्मरूपत्व
म स्फुटतरं कथितं मया तुभ्यं पुनः प्रवक्ष्यामि ज्ञानाद्यस्य हृतिर्भवेत् अविद्यया सदा ग्रस्तं परब्रह्म निकी
र्तितं आनंदात्मस्वरूपं यत् साक्षिचैव सदा स्थितं अद्वयं भेदगंधेन रहितं तत एव हि सर्वदोषविनिर्मु
क्तं निश्चलं गगनोपमं इदमेवाहमात्मास्मी'त्येतन्मे ध्यानकं परं इदमेव स्वयंज्योतिर्मत्तो भेदविवर्जितं
दंडं शिखोपवीते च तथा दंडक एव च न ब्राह्मणो वर्णो वा दंडो मूर्खो मे च कदाचन शर्मा नैदं करस्य सितं
यद्येवमवतिष्ठते कृतकृत्यस्तदा पश्येन्नपरं ब्रह्मात्मरूपतः स्वरूपो यत्तु पश्यंति ध्यानेन तत्परमं पदं चक्षु
र्वेदहीनां ज्योतिः स्वप्रकाशं हृदि स्थितं आत्मनो स्वावगत्यर्थं तत्वपदार्थस्तेनधुना ब्रह्मोपनिषदि प्रोक्ताश्च
वस्थाः कथयाम्यहं निरवस्थाः प्रमानेन आनंदात्मा स्वयंप्रभः मायामयीरवस्थास्ता स्वप्नतुर्ययातिम
र्वदा तासां स्थानानि चैतानि कथितानि मनीषिभिः नाभिश्च हृदयं तद्वत् कंठो मूर्द्धा तथैव च नाभिर्नै ३
नमो दृष्टिस्थाने जागरणे सदा सुप्तिस्तु तुरीयाणां हृदि कंठे च मूर्द्धनि अत्र जागरणे स्वप्ने सुप्तौ चैव
तुरीयके ब्रह्मा विष्णुश्च रुद्रश्च परमात्मा च देवता परमात्मा च तुर्यो वै सर्वदेवादिरूपभाक् कार्यकारण
हीनोयमवाङ्मनसगोचरः आनंदात्मा स्वयंज्योतिः स उक्तो वेदवादिभिः यस्मिन् लोकाः कर्मफलेन लोका

आ॰ पु॰ भेदवर्जिते भेदो वेदास्तथा यज्ञा माताऽपि च पिताऽपि च स्नुषेत्यादिमं माध्यासानस्मुखेऽप्यत्र लोकवत् चंडालः
३२५ २ पौल्कसस्तद्वत् संन्यासी च वनी तथा यत्यादिकोऽयमध्यासो मम नास्ति स्वभावतः अधमस्त्वजमो वाह्मे
नानि करणानि मे दुःखस्यैव सुखस्यापि इहवाऽपि परत्र च सुखं वाप्यथवा दुःखं भेदस्यैव प्रकीर्तितः सं
३२१ सारोऽयमयार्थोऽयं मयि नित्ये न विद्यते एकमेवाद्वितं तद्ब्रह्म परं निर्वाणसंज्ञितं विशुद्धचेतसां नित्यं भाति स्वे
नैव तेजसा ऋषयः पितरो देवास्तथान्येऽपि महौजसः तत्र केपीशते नैव वक्तुं ये देवमहेश्वरे यस्य ज्ञाना
तीते देवसर्वज्ञः कोऽपि कर्हिचित् ऋष्यादीनां भवेन्नैव किंकरो यमनायवत् जगदेशस्तथाज्ञाता ह्यस्मा
भिः कल्पितं द्वयं वस्तुतो नैव नानात्वं द्वैतं पुरुषे विद्यते यतः एक एव स्वयंज्योतिः कूटस्थः काष्ठाग्निवत्सदा
चतुर्विधेषु भूतेषु कार्यकारणरूपिषु सर्वव्यापी यथाकाशो बुद्धेरप्यन्तरः स्थितः अधिष्ठाय च भूतानि
वसत्यव सराज्ञवत् मध्यस्थश्च भूतानां व्यापारानन्नपश्यति विद्वानः केवलो जाद्यलेशेनापि विवर्जितः
चेतनोऽपि पुमात्राय चेतनादिगुणाः सदा स्वभावात्त्रिगुणो यस्मात् भेदगंधविवर्जितः स्वामी सर्वस्य
जगतः सर्वदा योनियामकः एकमेवात्मनो रूपे ऊहते बहुधा च यत् तस्यात्मनोऽत्र विज्ञानं उपायं प्राहुरीह
यो स्वदेहवाऽपि बुद्धिवासरणीं प्रविचिंतयेत् चतुर्मात्रेण योंकारमात्मानमनुतरारणिं मात्रापादाद्यभेदेन
ध्यानेनमथनेन हि अभ्यस्तो तीय मानास्यान्निगूढः प्रकटः सदा अरणीमंथनाद्यद्वत् अग्निः सर्वप्रदा

ह्रकः अविश्वासेन कर्तव्य अविर्भावे निजात्मनः यथा यंत्रादिपीडातः उपायाल्लभ्यते नृभिः तैलादिकं
तथात्मापि तपः सत्यादिसंयुतः आत्मज्ञैर्लभ्यते शश्वत् बुद्धो स्वस्य निजात्मभिः जीवतो परिगृह्याप
मानेदात्मा स्वयंप्रभः संसारे वर्त्तते ज्ञातो जीवो जीवः प्रजायते ऊर्णनाभिर्यथा तन्तून् सृजते संहर
त्यपि जाग्रत्स्वप्नेन यथा जीवः सृजत्यत्ति च सर्वदा अजीवतातदा तस्य जीवस्यास्य भविष्यति आनंदा
त्मानमात्मा स्थं यदायमवलोकयेत् यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनंदत्वं च जीवस्यैवं
ज्ञात्वा मुच्यते बुधः सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवस्थिते आत्मविद्यातपोमूलं जीवो ज्ञात्वा विमु
च्यते मनसो निग्रहो नित्यं नान्यथा जन्मकोटिभिः एतत्तेभ्यन्तचिंहृक्रमहं वक्ष्यामि तच्छृणु मनो हि
द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च अशुद्धं कामसंहितं शुद्धं कामविवर्जितं मन एव मनुष्याणां कारणं
बंधमोक्षयोः बंधाय विषयासक्तं मोक्षे निर्विषयं स्मृतं यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते ।
ततो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा निरस्तविषयासंगं सन्निरुद्धं मनो हृदि यदायात्यात्मनो ।
भावं तदा तत्परमं पदं यथा स्वमेद्वयाभ्यासात् स्पंदते मायया मनः तथात्र ग्रहणाभ्यासात् स्पंदते माय
या मनः अद्वये च द्वयाभ्यासे मनः स्वेनेन संशयः अमनस्तां तदा याति ग्राह्याभावेन तद्ग्रहे अमनस्ताय
दा तस्य मनसस्तु हृदीदृशे अकल्पनमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते

आ.प्र. सुषुप्तिवद्यदातस्मात्मनस्तातदाभवेत् केचिदेवंसमिच्छंतिनयुक्तंतद्विभेदतः निगृहीतस्यमनसोनिर्विक
२२० ल्पस्यधीमतः प्रचारोजागरेनैवसुषुप्तेनोऽन्यतस्तमः लीयतेहिसुषुप्तेचनिगृहीतंनलीयते तदेवंनि
र्भयंब्रह्मज्ञानालोकंसमंततः अजमनिद्रमस्वप्नमनामकमरूपकं सकृद्विभातंसर्वज्ञंसुषुप्तेनचतादृ
330 शं अमनस्तांगतेचित्तेमाप्यायंभरितपुण्यतः सर्वाभिलाषविगतःसर्वचिंतासमुत्थितः सुप्रशांतः
सकृज्ज्योतिःसमाधिरचलोऽभयः ग्रहोनास्मिनेवोत्सर्गश्चित्तंवाकस्यचिद्भवेत् आत्मसंकलनादात्माय
द्यनिश्चलतांगतः आत्मरूपंभवेच्चित्तंनयातिसमतांगतं तदासमाधिरेषस्यात्अमनस्ताभवोम
हान् वेदांतोदितसंगूढोहस्पतेगुरुवक्त्रतः अस्पर्शयोगनामायंदुर्दर्शःसर्वयोगिभिः योगिनो
भय बिभ्यतिह्यस्मादभयेभयदर्शिनः ज्ञात्वैधवस्तुरूपंतत्तन्नलभेनेकदाचन अलब्ध्वांतरमात्मानंवदंतिस्वा
वबोधतः अमनस्तांसुनिर्जल्पामजल्पामपिसर्वदा अपकारणमेतेषांप्रयमेभ्योऽतिदर्शने पश्चा
न्नानाविधाप्रज्ञानज्ञन्यामानवर्जिता आत्मासर्वेषुभूतेषुसर्वभेदविवर्जितः चिदानंदवपुस्त्वेकर
तीदंनोपपद्यते जन्मादीनांसुखादीनांव्यवस्थायाश्चदर्शनात् पुरुषास्ततएवैतेभिन्नाःसर्वशरीर
गाः एकाप्रकृतिरित्यादिसूत्रेत्तोतेननोबहु मुक्तोविनाशमायातिएकस्तावबहुधाततः ध्रुयामि
स्यंप्रकाएवैरूपांतरमयापिवा मनःप्रयातिकेनैतदात्मतादात्म्यमाव्रजेत् इत्यादिकंभयंहृद्याम

ह्यमनस्तामक्षतं अनुभयचतोहमिंविद्यायाश्चवशंगताः योगिनः पंडितंमन्याभक्तवतस्यासधाः
रिणः ह्यत्वतज्ञानरहितोह्यश्मवन्निश्चलाश्मपि आनंदात्मानमभयेसर्वदाहृदयेस्थितं स्वीयं
लभतेनैवजनेयद्वद्धांशुःकरेनिधिं सर्पस्तत्रसदात्मानज्ञानहीनेचकेचन पश्यतःसुखविज्ञानस्व
न्याएवंवदंतिहि ध्यानात्अपिचतेमोहं अमनस्त्वंवदंतिहि मनसोनिग्रहायत्तं अभयंसर्वयोगिनां
दुःखक्षयप्रबोधश्चाप्यक्षयाशांतिरेवच यतस्ततोमनोरोधःसर्वेषामपिसंमतः जेतव्यंमनएवादौस्वा
त्मनःक्षेममिच्छता जयतस्यवदंत्येवदुर्जेयस्यापिचेतसः उत्सेकउदधेर्यद्वत् कुशाग्रेणैवबिंदुनाः
मनसोनिग्रहस्तद्वत्भवेदपरिखेदतः राजिस्वनःसमुत्सेकःउदधेरेवमत्रसः सागरस्यपुराकल्लोल
लोलैःकटिनीकृते अण्डानिटिट्टिभःकश्चित्टिट्टिभीभिर्विवारितः मुमोचगर्वमापन्नःकदर्थीकृ
तःसागरे टिट्टिभीमेवमाहाथमाभयंतेस्तुभामिनि हरेयदिममांडानिसागरोमोहगर्वितः तदा
हंमदमज्जनंकरिष्यामितनोदकं सागरेपथ्यमेसम्यक्भयतःक्षीणवर्चसं एवमज्ञानमोहेषाः
अशक्तंवर्जयेतिच कुसमर्थःकुवानेचउन्माकावाकामपारमत् एवमज्ञाममुमोचाण्डानांडानिसटि
हिभः तत्रवजाययासार्द्धं आहारार्थंकाचिद्गतः एवमज्ञागतेतस्मिन्टिट्टिभजाययासह समु
द्रःस्फुतवान्सःसन्जहारांडानितस्याः गिरिप्रवरकल्लोलात्प्रहसन्निवमानसः गृहीत्वाच

श्रा॰ पु॰ ३३८ तदंडानि टिट्टिभस्य स्मरति पतिः विचारयदिदं चित्ते जानानः परमेश्वरं स्थावरजंगमाः सर्वे परमेश्व
रभृतयः ततो त्र कस्य किं वा स्यात्कदा केन कथं च वा न ज्ञायते यतस्तस्य मायालोकेति दुर्घटा ततो दे
शस्य को नाम तथा मित्राणि कानि वा कः कालः का च वा शक्तिः तच्च को वेत्ति टिट्टिभः न निश्चितं
मया यस्मात्तस्मादंडानि तस्य वै समग्राणि कुत्र देशे स्थापयिष्यामि पक्षिणः इति संचिंत्य संस्थाप्य ता
न्यंडानि महोदधिः देशे सुरक्षितेन गर्हेन यथा सर्वमवस्थितः शरीरे जगाम यावत्तद्देशं जायया स
ह टिट्टिभः स हि पुत्राणामंडानि जलधेस्तटे अपहृतानि संरक्तनयनः क्रोधमूर्छितः समुद्रशोष
णायैव सञ्चक्रे निश्चयं तदा टिट्टिभी ताह पं हृत्वा स्वपतिं हितकारिणं उवाच वचनं सम्यक् जाया
युक्तिमनिंदितं कुत्र चाल मंडजः स्वल्पकश्चायं सरितां पतिः तेन सार्द्धं कथं वैरं करोषि न्यायवर्जितः १
मैत्री चापि विवादो वा तुल्ययोरेव कीर्तितः समुद्रेण कथं तुल्यस्त्वं भवत्यंडजात्र हि दैर्घ्यो हि भवतो
देहः षोडशांगुलमानतः हस्तमात्रे च पत्राणामायामो द्वादशांगुलः चरतां हंत समं पादयुग्मेन व
र्तितं तु ज चंचुः कुशाग्रसदृशी यत्तौ च मण्डलौ तव द्वादशांगुलसमानो वीरयित्वा समाविद इ
तोधिको न तद्देशो वा ह्यो वाप्यंतरो पि वा कालः सदैव कृपत्तनिर्यन्नो निगतस्य हि देवदैत्यम
नुष्यादौ कालो वैषम्यकारणः मित्राणि नैव तेऽस्यानि मां विना दीनमानसां धनानामायाति १

२ 331

लब्धव्यापारा न भवंति हि अमित्राण्यपि मित्राणि न तेन दर्पिपदिणः वाणमात्रेपि चाकाशे गंतुं शक्नोभ
वान्नहि जन्मनादिहि भल्लब्धं तु भवानयोऽज्ञाधम समुद्रस्यास्य देशो ये लक्षयोजनमानतः अर्वाक
तीरे परे तद्वन्नहि लक्ष्ममिति कीर्तितः अधस्ताच्चाभवोपावनत्नावन्मानमदीरितं अयं सहारकाले ऽ
स्मिन् त्रिलोकीमखिलामपि आप्लावयति कल्लोलैः कल्पद्रुवमहासरः यावंति भूमौ भूतानि तावं
त्यंबुमहोदधौ वसंति सर्वदा तस्मिन् रत्नानि विविधानि च अस्य मित्राणि देवाश्च मनयो पितया
धनाः अयं पद्धतिर्देवानां मनुजानां च सर्वदा रत्नजातमशेषं च जातः साक्षान्महेश्वरात् मैनाका
द्यामहाशैलाश्चानेकशतयोजनाः शक्राद्भीतास्त्वसंभीतास्त्वनेनावारिराशिना इत्थं तमात्मनः सर्वं
समुद्रस्य च चिंतय व्यर्थं विरोधमाकार्षी रात्मनो नाशकारणं हनुमत्वच्चरीं ह्रस्वी नामोर्व्यादिर्होऽज त
वनाशाद्दिदानीमां माहव्यादीन दर्शिनी इत्यादि वक्तृ शाः प्राह टिट्टिभिं टिट्टिभस्तदा क्रोधसंरक्तनय
नेनस्फुरद्रोमकूपकं ज्ञात्वा सटिट्टिभी वाक्यं टिट्टिभः कृतनिश्चयः इदं वचनमाहैनां तां त्रिपदेन्य
मयागतो संपत्काले मित्राणि संति कोटिसहस्रशः आपत्काले यत्तन्मित्रं तन्मित्रं परिकीर्तितं व्यस
ने समनुप्राप्ते यो येत्यजति देहभाक् स तस्य शत्रुर्विज्ञेयो ह्यपि जापास्तनादिकाः पुण्यवापप्यथवापा
येहृत्खेवाङ्ः स्वमेव वा निश्चितं यो निवर्तेत तन्मित्रमिति कीर्तितं आत्मनो यस्मनो दर्शनयः प्राज्ञो

आ॰
पु॰
३३२

332

वहुः भाषते व्यसने समनुप्राप्ते सत्तशत्रुसमो मतः आत्मनो भ्युदयाकांक्षी मित्रं शत्रुस्वरूपिणं निह
न्यमयमं हन्यात् साक्षात् शत्रुं ततः परं अतस्त्वं मित्ररूपापि शत्रुवत् प्रतिभाषसे अवध्यास्त्रीति मत्वा
हे न करोम्यघपातकं अपि सप्तपदे मित्रं वदं त्वत्र विपश्चितः त्वया सह चिरंकाले स्थितो हं स्वस्थमानसः
करिष्यामि कथं द्रोहं स्त्रियो मित्रस्य तेधुना ततो याहि त्वमेतस्मात् स्थानादन्यत्र माचिरं एक एव स्वी
यैर्गणैः शोषयिष्यामि सागरं चञ्चुपक्षद्वयेनापि संगृह्यास्य जलं वहि अचिरेणैव कर्त्ताहं अंध रूपं पयो
निधिं एवमुक्त्वा ततो जायामुत्सृज्य चैनमल्पया समुद्रशोषणाया सोद्यतः टिट्टिभस्तदा समुद्रशो
षणे तस्य निश्चयं वीक्ष्य सा तदा पतिव्रता महाभाग्या तेनैव सह देवाकरोत्स्वयं टिट्टिभि टिट्टिभश्चोभौ दिवा
रात्रौ च सर्वदा समुद्रशोषणोपायं कुर्वाते श्रमवर्जितौ चंचुद्वयेन यत् स्वल्पं नीरमादाय सागरात् ग — गङ्गा ५
छतो माहता देवतें नीरमुपक्षिपति तोनत्यापि जले गत्वा गत्वाप्यनेकशः नीरमादाय तद्भूमौ क्षिप
तस्तावनेकधा एवं प्रहतो तो वीक्ष्य टिट्टिभिट्टिभस्ततः टिट्टिभाश्च परे प्रोचुस्तस्यास्तस्य निवारणे
वाक्यं वक्तुं विनीतौ च प्रोचतुः टिट्टिभानिति सागरं शोषयिष्यावः सर्वथा चात्र पक्षिणः मित्रता चे
त् सहाय त्वं कुर्वन्तस्य विनाशने अद्यैवं वः स्वनीडानि व्रजं तत्र चयथागतं एवमुक्ते तथा सर्वे टि
ट्टिभाश्च क्रुधयमे समुद्रशोषणे यहात् सर्वमेतो समुद्यतौ अण्डजाश्च वमेवैते नानाभेदाः समागताः ३३२

सर्वएवसमुद्रस्यशोषणेपक्षिणोयत्नाः त्रिलोकीम्पर्यटन्कोपिस्वेच्छयानारदोमुनिः पक्षिणस्तान्त्रि
शीघ्र्याथबहुधाचन्यवारयत् निवारितापयदानेवचक्रुरवाग्निशीर्षैः स्वगाः ततोपायमवोचैतान्गरुड
स्यागमंप्रति गतेषुतेषुगरुडआगतोभयवर्द्धनः तस्यदर्शनमात्रेणसागरोतीवविह्वलः भीत्या
वैटिट्टिभस्याथप्रददौदंडानितान्निजः एवंखेदेनरहितः पुरुषोपिमनोजये कुर्वीतटिट्टिभोयद्वत्
समुद्रस्यविशोषणे निश्चयेनकृतेपुंसोदैवास्तस्यसहायिनः भवंतिटिट्टिभस्याभूत्सहायोगरुडोयथा
पुण्येकर्मणिसाहाय्यंप्राप्याः सर्वेपिकुर्वते रामस्यवानरायद्वत्स्वदारानयनेतिवित्ततः उद्यमः साहसंधै
र्यंबलंबुद्धिः पराक्रमः षडेतेयस्यतिष्ठंतिसस्सर्वंप्राप्नुयात्पुमान् अभूतंवायथावासाल्येउपक्रांतंनसंत्य
जेत् कार्यंयथापदंसिंहः एष्टनोनिदधातिन कालकूटंहरस्तद्वत्समुद्रोवडवानले कूर्मोभूमिंचखं
सततंदधात्येवापरित्यजेत् इत्यादिचिंतयित्वायेनिग्रहेमनसः पुमान् प्रवृत्तोननिवर्त्ततेमरणे
नैविसंकटे उपायेननिगृह्णीयात्विक्षिप्तंकामभोगयोः सुप्रसन्नंलयेचैवयथाकामोलयस्तथा
दुःखंसर्वमनुस्मृत्यकामभोगान्निवर्त्तयेत् अजंसर्वमनुस्मृत्यजातंनैवतुपश्यति लयेसंबोधयेच्चित्तं
विक्षिप्तंशमयेत्पुनः सकषायंविजानीयात्समप्राप्तंनचालयेत् नास्वादयेत्सुखंतत्रनिःसंगःप्रज्ञया
भवेत् निश्चलंनिश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः यदानलीयतेचित्तंनचविक्षिप्यतेपुनः आलिंग

आ॰पु॰ ३२२
333

न मनो भासे निष्पन्नं वधनात तदा स्वच्छं शीतं सुनिर्वाणं अकंप्यं सुखमुत्तमं तावदेव निरोद्धव्यं हृदि यावत्क्षयं व्र
जेत् क्षयोपि मनसः सर्वं ममताभाववर्जितः एतज्ज्ञानमिति प्रोक्तं शास्त्रज्ञं मनीषिभिः ध्यानं चैतत्फलं तद्धत्
नातोन्यत्र विद्यते धिके शास्त्राणामभ्यासतो नित्यं वाग्मित्वमधिकं भवेत् दुरःकं वादिशोपक्षेनेत स्मादधिकं परं
इदं विज्ञाय मेधावी सत्यग्रंथेषु सुखी भवेत् ज्ञानोपि सुखदो न स्यात् शेषो ग्रंथस्य विस्तरः मनसो निग्रहं हि
त्वा तस्मात्कार्यः स एव हि दानमिज्या तपः शौचं तीर्थं वेदाः श्रुतं तथा अशांतमनसः पुंसः सर्वमेतन्निरर्थकं
मनोनिरोधतः सर्वलोकद्वयफलं भवेत् अभंनिरोधेन विना न किंचिदपि लभ्यते मोक्षार्थिना यदा सम्य
क् निरुद्धं तन्मनो भवेत् अचिंत्यं ब्रह्म मनसा न चिंत्यं विषयाः पथा मनसा त्र यतोऽचिंत्यं न चिंत्यं ते न जंतुभिः
न चिंत्या विषयास्ते वै मनसा तु मुमुक्षुभिः शत्रुमित्रादिसंजातपक्षपातविवर्जितः अनायासात्तु मानेष
ब्रह्म संपद्यते तदा मनसा च विशेषेण भाव एव विशेषकं अविशेषात्मभावेन सतो भावो भविष्यति अवि
विशेषे हि यत्तज्ज्ञाने मनसा परमं पदं तदेव निष्कलं ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवं निर्विकल्प
मनंते च हेतुदृष्टांतवर्जिते अप्रमेयमनादेयं यज्ज्ञात्वा मुच्यते बुधः तस्मिन्नात्मनि विज्ञाते चित्ते च विलयं
वं २ गते एमनतो विमात्रस्य निर्मनस्कस्य योगिनः न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मु
क्त इत्येषा परमार्थता एवं रूपं विजानाति स्थानत्रयविलक्षणं स्थानत्रयच्युतेस्तस्य पुनर्जन्म न विद्यते ३२२

एवंचेतज्ज्ञायतेपुंसावेदवाक्यंगुरोःसदा मंतव्यएकएवात्माजाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यतीतोयोवर्त्त
तेसर्वदेहिनां स्थानत्रयव्यतीतं तस्मज्ज्ञातोसोपितथाभवेत् स्थानत्रयव्यतीतस्यपुनर्जन्मनविद्यते ए
कएववहिभिन्नात्माभिन्नेभिन्नेव्यवस्थितः एकधावहुधाचैवदृश्यतेजलचन्द्रवत् अथचेतज्ज्ञायतेपुंसा
सर्वभेदविवर्जितः वहुत्वेजीवतत्वेलग्नेयुक्तितोनाशमाव्रजेत् युक्तिरेषाविभोस्तस्यविज्ञानेपरमात्म
नः घटसंवृतमाकाशंनीयमानेघटेयथा घटोनीयेतनाकाशंदेशाद्देशांतरंप्रति एवंदेहस्यगमने
ह्यात्मादेहेनसंवृतः नक्वचित्प्रयात्यन्यदेहदेशान्तरंव्रजेत् घटवद्विविधाकारोभिद्यमानःपुनःपु
नः भेदंस्वस्यनजानातिजीवोजानातितंसदा आत्मनोनैवभिन्नोयंजीवोनानाविधोपिवा तेनदेहात्म
नोभेदोनतस्यापिनकश्चन आत्माह्याकाशवज्जीवैर्घटाकाशैरिवोदितः घटादाविवसंघातैर्जातेवे
दनिदर्शने घटादिषुप्रलीनेषुघटाकाशादयोयथा आकाशेप्रलीयंतेतेनतद्वज्जीवाःसर्वात्मनि यथै
कस्मिन्घटाकाशेरजोधूमादिभिर्युते नसर्वेसंप्रयुज्यंतेतद्वज्जीवाःसुखादिभिः रूपकार्यसमाख्या
श्चभिद्यंतेतत्रतत्रवैयथा आकाशस्यनभेदोस्तितद्वज्जीवेषुनिर्णयः आकाशस्यघटाकाशोविकारावय
वौयथा नैवात्मनःसदाजीवोविकारावयवौतथा यथाभवतिवालानांगगनंमलिनंमले यथाभव
त्यवुद्धानांआत्मापिमलिनोमलैः मरणेसंभवेचैवगत्यागमनयोरपि स्थितसर्वशरीरेषुआकाशा

अस्पंदमानं चित्तस्यात नाभासमजं तथा ७

आ.पु. नविलक्षणः यत एव ततो भिन्नस्यात्मनो भिन्न इव वा न कश्चिज्जायते जीवो देहसंभवजन्नियतः जातो।
३२४ मृत इति प्रोक्तो व्यपदेशो हि यथैव तु स्वप्नो मायामयो वापि जीवो वापि च कृत्रिमः जायते म्रियते यद्वत्
मृतिजन्मविवर्जितः एवं जीवा अमी सर्वे मृतिजन्मविवर्जिताः जायन्ते च म्रियन्ते च भान्ति हि स्वावलो।
किताः जन्मादिके ततो जीवः कोपि नैव प्रयाति हि किन्तु चित्तं तथाभूतं दर्शयेत् मरणादिकं एवं जीवाः
सदा ज्ञेया जन्मादिपरिवर्जिताः चित्तयोगात्तथाभूता दृश्यन्ते तत्तथात्मकाः ऋजुवक्रादिकाभासो
ह्यलातस्पन्दितो यथा ग्रहणग्राहकाभासं मनःस्पन्दितं तथा अस्पन्दमानमलातं अनाभासमजं य
था। अलाते स्पन्दमाने वै नाभासा अन्यतोभुवः न ततोन्यत्र निस्पन्दान्नालातं प्रविशन्ति ते अनिर्गता अला
तात्ते द्रव्यत्वाभावयोगतः मनस्यपि तथैव स्युराभासस्याविशेषतः मनःस्पन्दमाने वै नाभासा अन्यतो
भुवः न ततोन्यत्र निस्पन्दान्मनः प्रविशन्ति ते नरिष्टंगाय यथा शब्दात् मायया नगरं च वै प्रतीयते
तथा सर्वं आत्मनोन्यत् समस्तं ते माया पिशाचतो यस्मात् सती तस्मान्न सा सती शब्दस्यात्मा तु नैव स्या
द्वाङ्मनसगोचरः शब्दो मायाहतो नात्मा स्यात्मानमुपयात्ययं एतन्नाशात्स्वयंज्योतिरेकत्वमुपया
ति हि शब्दं परं ब्रह्म तस्मिन् क्षीणे यदक्षरं तदेकत्वमिति प्रोक्तं सर्वभेदविवर्जितं एकत्वं परमं
ब्रह्मज्ञानकामस्त्वतः पुमान् शब्दब्रह्मपराविद्वान् वराको तगतभ्रमः द्वे ब्रह्मणी वेदितव्ये शब्दब्र ३२४

334

स्मपरं च यत् शाब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति शाब्दब्रह्मसमभ्यस्य तज्ज्ञात्वा परे स्मति पलालमि
वधान्यार्थी त्यजेद्ग्रन्थमशेषतः गवामनेकरूपाणां एकरूपं यथा पयः नानाविधानां देहानां एक आ
त्मा तथेरितः अतः सर्वेषु भूतेषु एक आत्मा व्यवस्थितः निरुद्धो नीरमध्यस्थो महानपि यथा घटः म
नसैवमसविज्ञेयः आत्मनः सुखमिच्छता इति सर्वाणि भूतानि मनो मेधा प्रकीर्तितः अहं ब्रह्मेति वि
त ज्ञानेनेत्रं मथनकारणं नवनीतं ततश्चैतद्ध्यानेनात्मानमद्वयं उद्धरेदुद्धरन्नतस्मात् स्वात्मानं भवसागरा
त् निष्क्रियं निष्कलं शान्तं यद्ध्यानेन समश्नुते तद्ब्रह्मात्माहमस्मीति ध्यात्वा त्वां कुर्यात् सदा पुमान् वासुदेव
वत्सलदैवेन ततयत्नेन वेदवादिभिः ज्ञानं तस्य निरूढं च कर्तव्याण्यत्वमेव हि सर्वभूताधिवासो यो
ई यो भूतेषु संस्थोपि सर्वानुग्राहकत्वेन तद्वास्म्यहमद्वयं इति तेम ततविहृत्क्रमनो नियहसंयुत उक्तं
ब्रह्माद्यवक्ष्यामि पुनः स्वकृतपरिते नारायणीयसंज्ञेय महोपनिषदीरिते आत्मप्रबोधसंज्ञेच
शृणु तत्वक्रमादिह येन शर्णामिदं विश्वं यद्ध्यायं सर्वदेहिनां शेते पुरेषु भगवान् पुरुषः पुरुषो
नमः विराड्रूपधरो यस्त्रिलोकान्निखिलानपि संग्रस्य शिशुवत् शेते शेषाख्ये जलमध्यगः
हिरण्यगर्भो भगवान् जीवानां विविवक्षयः वर्तते शयनेनायं तल्पगर्भे यथाशिशुः पश्चैश्वरोत्र
भवान्वैषम्यादिविवर्जितः आविद्याकं ज्ञकः सोयं उक्तो नारायणः पुमान् अकामयत देवोयं सिसृ

आ.पु. तन्निखिलेजगत् प्रजाःसृजयेतिब्रह्माहो कएवव्यवस्थितः संकल्पेनैवजगत्सर्वंसृष्टवान्पुरुषःपरः देवा
३३५ निमांश्चनिखिलान्नानाभावसमन्वितान् ब्रह्माशक्रस्तथादित्याःरुद्राश्चवसवस्तथा विश्वेदेवाश्चसा
335 ध्याश्चतथान्येदेवयोनयः नारायणात्प्रजायंतेसहसर्वैश्चराचरैः वर्तंतेतत्रलीयंतेतस्मिन्नेवमहात्म
नि यतएवंततोदेवएकोनारायणःस्मृतः ब्रह्माविष्णुश्चरुद्रश्चशक्रोन्येदेवताःगणाः आदित्याय
६ श्वेश्वोचयेचान्येदेवयोनयः दिशश्चप्रदिशश्चैव अधश्चोर्ध्वंचमध्यमे महाभूतानिभूतानिस्था
वराणिचराणिच भूतंभव्यंभवत्सर्वंसकालेसदसन्नते यदस्तियच्चनास्तिनतत्सर्वंनारायणात्मकं
पदात्मकेमिदंविश्वंपुमान्नारायणस्ततः विनाशरहितस्तद्वत्प्राणायैःपरिवर्जितः कार्यजातमि
दंसर्वंविकल्पइतिकीर्तितः अज्ञानेकारणंतद्वत्ताभ्यांचपरिवर्जितः माययाजडरूपिण्यासर्वस्व
हिर्विहीनया कालत्रयेपिरहितःसर्वभेदविवर्जितः अस्मान्नारायणाद्देवान्भिन्नःकोपिनवस्तु
तःस्वरूपत्वात् द्वितीयोयोनासीन्नास्तिनभाव्यपि एवंयोवेदपुरुषःसकलात्मासारिथिथियं रुद्रा
भिधोस्वबोधाख्योसोहमस्मीतिरूपिणी यग्रहस्यमनःप्रांतेशरीररथगोचरे इंद्रियाश्वैर्भृशंदां
तैर्गच्छन्विष्णुपदंपरं एवंनारायणस्यात्मविद्यायोवेदवेदवित् तीर्त्वासआपदःसर्वान्प्राप्यभोगां
न्नचेप्सितान् अन्तमस्त्वाब्रह्मलोकंगत्वामोक्षंचविंदति ॐनमोनारायणायेतिमंत्रःसर्वार्थसाधकः

देहिनां निखिलानां सद्विजानां प्रणवादिकः याह्यष्टनारायणज्ञानात् फलेनाहक सकीर्तितं अस्यापि
ज्ञानतो यस्मात्तज्ज्ञायते पुरुषो मना उपायः प्रणवो यद्वन्नारायणगतिप्रति तद्वदष्टाक्षरो ह्येष उपा
यः सर्वदेहिनां अमंत्रं जपेन्नरो नित्यं नारीवा पापमनः क्षये आनन्दात्मानमात्मस्थ्यं पश्येन्नारायणं प
रे किंपुनर्योऽधिकारीस्यात् सर्वपापविवर्जितः सपतमनः जयत्येतन्नरानन्दात्मनमद्वयं इतिनाराय
णीयायाब्रह्मविद्यासमीरिता साक्षान्महोपनिषदि प्रोक्तानाम्नाणउनामतः एवमाहुः पराविप्राविद्वां
सो वेदवादिनः एकोनारायणः पूर्वआसीद्धि स्वजनेपुरा तदाब्रह्मादयोदेवानासंभूतानि एवच
चरस्थिराणि चान्यानि नैव किंचित्तथापरे एकाकी सपुमान्पूर्वो नैवरेमे निरंजनः द्वितीयं ध्यायतस्त
स्य पुरुषस्य महात्मनः त्रयोदशस्वतास्तस्य कन्याचैकाभवत्तदा असंगस्यासतीमायापुर्वत्यासगतः
सतः त्रिधासाकुरुतात्मानं कन्यापुरुषकारिणी अधिदैवमथाध्यात्ममधिभूतेचभामिनी वीक्ष्य
माणः पुमानेकस्तामेतामसतीसुतां आत्मानं बहुधा मेने तद्दृष्ट्वेनमोहितः यथाकन्यातथैवतेत
स्वतास्त्रत्रिधास्थिताः तेषां च कारणान्यत्र पूर्वंसृष्ट्वाच तान्प्रभुः असृजच्च क्रियाशक्तिः तेषां
कार्यं च कारणं पृथिव्यापस्तथा तेजो वायुराकाशमेव च पंचकं कारणं प्रोक्तं स्थूलं सूक्ष्मं च मध्यमं
तद्धि विधात्कारणस्य कार्यं च द्विविधं भवेत् क्रियाशक्तिस्तया प्रोक्ता समाणाः इति कीर्तितः कार्यं

आ.पु. ३२६ रूपोत्र भूतानां कारणो वापरस्य च अहंकारो महांश्चित्तं इंद्रियाणि दशैव हि त्रयोदश स्मृता प्रोक्ताः कल्पादु
द्विश्चतुर्दशी हिरण्यगर्भः संप्रोक्तो विभागस्याधिदैवकः अधिभूतं विभागस्य जंगमानि स्थिराणि च
३३६ भूतान्याध्यात्मकश्चाय मत्येकं सर्वदेहिनां कालश्च सर्वभूतानां सृष्टिस्थितिविनाशकृत् पुरुषे
णापरेणायं सृष्टः सर्वस्य हेतुना सृष्टान्तदखिलं विश्वं सत्त्वरूपमुपाश्रितः पुरुषो देवतास्सृष्टिमे
वं नारायणो करोत् केनचिद्धि निमित्तेन क्रोधमाहार्य विश्वकृत् भ्रुकुटीकुटिलात्तस्य लला॰
टात् दीप्ततेजसः कोपाविष्टः स्वयं देवो रुद्रं तमुदपादयत् नीलकंठं लोहितां त्रिनेत्रं शूल॰ ं
धारिणं विभ्रत वीर्येणायस्मात्र न कोप्यस्ति समाप्नुमान् ऐश्वर्यस्य समग्रस्य यशसः श्रियः ज्ञान॰ धर्मस्य
वैराग्ययोश्चैव एवमाश्रयः सत्यस्य ब्रह्मचर्यस्य मनसो निग्रहस्य च तपसश्च समस्तस्य शावरा
घोस्तथैव च अस्मात् देवसमस्तानां देवादीनां शरीरिणां ऐश्वर्याद्याः गुणाः सर्वे जायन्ते गुणराशि
तः अयं समस्तदेवानां मुनीनां च महात्मनां नानाविधास्त्वियासु कथितः परमो गुरुः एतेसं
प्राप्य संहारकाले लोकत्रयीमिमं तूलराशिं यथा वह्निः प्राप्य नाशं व्रजेस्फुटं पुनश्च ध्यानमावि
ष्टो देवः स सर्वहृत्कस्फुटं अनन्तस्य ध्यानयुक्तस्य ललाटात्स्वेदबिन्दवः ब्रह्माण्डजनका आपः शक्रा
भुवनसर्जने अप्सु स्वेदस्वरूपासु वीर्यमवासृजेत् आत्मनायत्परतो वै देवो नारायणः प्रभुः १

वीर्यंतदउमभवत्तत्राहिमंमहात्मना हैमंमनोरमंचित्रेसूर्यकोटिसमप्रभे आउस्यांतरभजत्ब्रह्माभूतानां
मादिमःस्मृतः छेदोव्याहृतिदेवानांहेतुर्योत्रचतुर्मुखः श्रवीपरोनरामव्यवक्तात्तस्तुहमादयः ब्रह्मणोवि
श्वमेतद्दिजानेसर्वंचराचरं एवमेवजगत्सृष्ट्वाह्येकएवसमायया नानाभवदःनानात्वंभेदभ्रममविवं
र्जितः यदेवंशकातेज्ञातेनैवायमधिकारिणा तदानारायणीयोक्तउपायश्चात्रकीर्तितं सहस्रशीर्षमि
त्यादिस्वराद्युतंतमेवहि आश्रित्यैवसहृदयेज्ञानयोत्राधिकारिणा अस्याग्रेयस्यमाहात्म्यमप्यत्रवि
विधंस्मृतं विज्ञानस्यतुकिंभूयोयतोमायालयंव्रजेत् एवंमहोपनिषदिकथितंज्ञानमीरितं आत्म
प्रबोधेकथितंस्पष्टंवक्ष्यामित्वधुना उपायंप्रथमंप्राहुरत्रोयंयस्यलब्धये आत्मावामावुपायोद्वौप्रण
वोष्टाक्षरस्तथा प्रणवोवाचकस्तस्यप्रत्यगानंदरूपिणः अष्टाक्षरोपिनैवैववाच्यवाचकयोर्भिदा अकारस्था
कारस्थम प्युकारोमिलितंत्रयं ॐकारस्तेनसहितोनमोनारायणायच अष्टाक्षरस्तुसंप्रोक्तःसर्वसिद्धिविधायकः
एतयोर्जपतोयोगीजपनात्समुपास्यच ब्रह्मविज्ञानउत्पन्नेसंशयादिविवर्जिते मच्यतेतत्स्वविज्ञापत्र
न्मसंसारबंधनात् यावन्ननिर्गुणंब्रह्ममोक्षालिंवनमद्वयं आविर्भातहृदयेतावत्सगुणंब्रह्मचिंतये
त् सगुणंब्रह्मसंप्रोक्तंविष्णुरुद्रादिभेदतः नानाविधनारदाद्यैरिदमत्यंतमादरात् यज्ज्योतिर्देवकीदेवी
वसुदेवादजीजनत् भौमस्यब्रह्मणोगर्भेदीप्तमग्निमिवारणिः योरश्मौगिरमायसेसविद्यांतापोहषी

आ॰पु॰ ३२० २ 337

महान् सप्रधपुरुषःसाक्षात्विश्वरूपधरोहरिः वेदव्यासेनकथितःशुकेनचमहात्मना नारदाद्यैरनेकैश्च
अन्तनिमित्तवेदिभिः यद्यप्येवसर्वासुर्नीरूपाविभूतयः तथापिमायावशगास्ताविनादेवकीसु
ते कचित्कामःकचित्क्रोधःकचिल्लोभःकचित्परे मदादिकेनक्लेशोस्तिकिंचिदेतत्कदाचन अर्जुन
स्यसखायोयंपांडवानांचदैवतं भ्रातावलभद्रस्यकनिष्ठोमदनस्यच पिताब्रह्मणएवस्तुकृष्णोनिखिलेपिज
गत्त्रये देहेयस्यपरिक्षीणंकौशलंविश्वकर्मणः रूपलावण्यसौभाग्यगुणादिविषयोमहान् गोप्यःका
मात्भयात्कंसोद्वेषाच्चैद्यादयोनृपाः संबंधात्वृष्णयःस्नेहात्पांडवाद्रौपदीतथा नारदाद्याश्चमुनयो
भक्त्यायस्यदिवंगताः वैकुंठंब्रह्मलोकाख्यंयंतोनावर्ततेगताः ब्रह्मणःसहसंन्यासीब्रह्मेवपरमंपदं
सदेवोद्वारकावासोमाथुरोगोपपालकः सजलोजलदोयद्वत्तद्वन्नीलोतिशोभनः इंद्रनीलमणिप्र
ख्यःसूर्यकोटिसमप्रभः आजानुबाहुःसुशिराःकंबुग्रीवोमहाहनुः कर्णांतनयनःसुदीर्घनासार
क्तोष्ठःसुस्मितः सुललाटकपोलश्चसुकर्णोनीलकुंतलः नखदंतसमुद्भूतभाभिर्भर्त्सितचंद्रमाः वि
शालोन्नतवक्षस्कविभ्रपादविराजितः हृतपीलोन्नतकरपादपद्मद्वयांचितः मांसलोगुल्फजान्वंस
कर्पराद्विस्थलेष्वपि कृशोदरोतिपीनांगोवज्रसंहननोयुवा पीनोन्नतमहाशोभ[illegible]नेनविराजितः व
र्तुलाभिःसुदीर्घाभिःस्वंगुलिभिश्चशोभितः करयोःपादयोर्युग्मेशाखाभिरिवपादपः चतुर्भुजउ २३०

दारांगः पीतकौशेयवस्त्रधृक् कांचीगुणसमाबद्धघंटिकामधुरस्वरः अनेकरत्नसंयुक्तं वलयांग
दनूपरः नानांगुलीयसंलग्न रत्नकोटिविराजितः ग्रैवेयेन समं कंठे दधानः कौस्तुभं मणिं हा
रवत्सश्रिमुक्तानां सहितं वनमालया कर्णयोर्दीर्घयोर्देवो बिभ्रत मकरकुंडले मयूरपिच्छस
हस्रांहेमरत्नादिनिर्मिते बिभ्राणो मकुटं तद्वत् तिलकं चातिशोभनं रत्नहेममयी चित्रा स्वर्णा
कारां समस्तर्धनि धम्मिलेनेकपुष्पौघमध्यगो रत्नराजितो विश्वलोकत्रयीनारीमनोनयननंदनः
शंखं चैव गदां चैव पद्मं चक्रं तथैव च दक्षिणाधःकरात् क्रमात् प्रादक्षिण्येन दधत्सदा गोभू
विप्रसंतापार्तिनाशनः आर्तिदः सदा धर्मदेवद्रुहो तद्धनं भूभुजां दैत्यजन्मनां यदा यदा हि धर्म
स्य ग्लानिः स्याद्धि तदा तदा अवतारमसौ कुर्वन् जातो देवकीसुतः एष नारायणः साक्षात्स
वेदेववपुः पुमान् ध्येयः सगुणरूपोऽयं मंत्रयोरधिदैवतं पावन निर्गुणं ब्रह्म भाति चित्ते त्रयो
गिनः सूर्यमंडलमध्यस्थो हृदि पद्मे अथवा पुनः गोकुलादौ च वा वाह्यदेशे तत्र कुर्वीत ब्रह्म
णि पदेवकीपुत्रे ध्यापतो मधुसूदने हृत्पद्मपदे चित्तस्थिते आत्मतया तदा दीपवत् स्वात्मनो भाने
हेतुर्भवति सर्वथा एतत् ध्यानाद्वययोगी सर्वभूतस्थितं हरिं ब्रह्मैककारणं नित्यं शोकमोह
विवर्जितं यत आत्मतया याति शुद्धांतःकरणः पुमान् कृष्णं ध्यायंस्ततो योगी न सीदति कदाचन

द्वैतमद्वैतमेवं स्यात्ज्ञाते द्वैते न चिंतयेत् संसारदर्शिसंसारे दुःखदा दर्शि दुःखदं सर्वाणि पुरुषो भेदं यस्त्वा
त्मनि विलोकयेत् यतो मायामयो ह्यत्र भेदको पि न विद्यते भेदवञ्चततः पश्येत् दुःखं यात्यनिदाह
णं विपरीतदृशी सर्वः क्लेशं लोको धिगच्छति अद्वैते द्वैतदृष्टिश्च विपरीता प्रकीर्तिता मुमुक्षु
स्तेन तस्मात्सद्वैतवत्दर्शिनो भवेत् नैवान्यचिंतरूपोयफलबीजोपमं यतः ततो हृदयपद्मस्य मध्ये भे
दविवर्जिते आनंदात्मन्यद्वैते सर्वबुद्धिप्रकाशके आधारभूते जगतां प्रकाशानां च कारणे ए
वमात्मन्यजानन्न दुःखं किंचिदाव्रजेत् यश्चात्माकथितः प्राज्ञः स एव हि न चापरः प्रज्ञाया
सा प्रतिष्ठा स्यात्जगतो साखिलस्य हि प्रतिष्ठा पत्र संप्रोक्ता न तद्ब्रह्म परिकीर्तितं प्रज्ञाप्रतिष्ठाब्र
ह्मैतत् ततात्मतया यदा तदा सर्वं परित्यज्य देहाद्यात्मधियं पुमान् स्वर्गादिलोकसंस्थानान्
कामान् नानाविधानपि उपभुज्य परं ब्रह्म याति सो ब्रह्मणा सह अत्रैव वा परं ब्रह्म गच्छेत् कुश
लभावनात् यस्मिन् ब्रह्मणि तज्ज्योति रजस्तस्य प्रकाशने आनंदश्च सदैवैकरूपातिशयवर्जि
तः तस्मिन् ब्रह्मणि भगवान् वासुदेवस्वरूपधृक् देवकीनयनानंदः सर्वदानंदनंदनः एवं मया
प्यनेकधाविर्भगवतः मयोच्यते एवं च ज्ञायते बोधो ब्रह्माहमिति योगिनः आत्मप्रबोधोपनिषदु
क्तं ब्रह्म समीरितं कैवल्योपनिषत्प्रोक्तं प्रपञ्चतत्त्वमिहाधुना आश्वलायननामात्र दृष्टवान् यः

स्वयंभुवं ब्रह्माणंसमवाप्यनरः आश्वलायननामा इदंप्रकृतमेधावीब्रह्मविद्यांपृच्छ यामहं जानीये।
भगवन्विद्यांब्रह्मणः श्रेष्ठरूपिणीं सेव्यमानां सदासद्भिर्निगूढांहृदयांबुजे सर्वपापंयया
जेतुरचिरान्नम्य योसौच परात्परं महेशानंपुरुषं यात्यसंशयं एवंपृष्टस्तदा तेनभगवान्
प्रपितामहः तस्मातुवाचयांविद्यांतांवक्ष्याम्यहमयने आस्तिक्यबुद्धिसंयुक्तोगुरुभक्ति
समन्वितः आत्मनोध्यानयोगेनब्रह्मविच्चप्रजायते नकर्मणानप्रजयानधनेनकदाचन।
ब्रह्मज्ञानमिदंकिंतुपरोद्देनैवज्ञायते स्वर्गादप्यधिकंप्रोक्तंआनंदात्मस्वरूपकं स्वप्रका
शात्मकं तेयततप्रयोगिनियतयोमलाः वेदांतज्ञानसंपन्नानिश्चितार्थाः सदैवहि विशुद्धधिषणाः
ब्रह्मलोकेत्रैवनचापरे ब्रह्मलोकेपरायांतिपरंब्रह्मसनातनं ब्रह्मणासहते सर्वेतदाया
तिनचान्यथा योनिमेवंप्रकुर्वीनपुरुषोब्रह्मविज्ञये एकांतेनिर्मलेदेशेसुखमासनमा
श्रितः शौचंयथाविधानेनविधायविगतश्रमः कर्मकृत्वाशिरोग्रीवशरीरंचर्जितास
नः संन्यासीसंनिरुध्यैवसर्ववाह्यांतरेंद्रियं गुरुंस्वभक्तिसहितः प्रणिपत्ययथाविधि हृत्पुं
डरीकेविमलेविचिंत्यार्कादिसंयुतं रागद्वेषादिसंमुक्तंतन्मध्येपिनयेन्मनः अशेष
दुःखसंमुक्तमानंदात्मानमद्वयं अचिंत्यमव्यक्तमजंशिवंमायाविवर्जितं अनंतंवेदजन

केमरणादिविवर्जितं एकं तथा स्वयंज्योतिः सर्वशक्तिसमन्वितं रूपादिरहितं तद्धनतज्ज्ञेयं पर
मेश्वरं एवं चिंतयितुं चेतो यदि शक्तं भवेन्न हि तदेवं चिंतयेदेतत् सगुणं परमेश्वरं उमा भगवती ।
येयं ब्रह्मविद्येति कीर्तिता रूपयौवनसंपन्ना वधूभर्त्रा तत्र सा स्थिता नानाजातिवधूनां हि विभ्र
ता महेश्वरी सर्वशक्तिमयी देवी सर्वतत्त्वमयी तथा यस्याः प्रसादतः सर्वः स्वर्गमोक्षं च गच्छ ।
ति इह लोके सुखं तद्वत् जंतुर्देवादिकोपि वा ब्रह्मा विष्णुस्तथा रुद्रः शक्राद्याः सर्वदेवताः
कटाक्षपातनाय स्याः भवंति न भवंति च पीनोन्नतस्तनी श्रोणिजघना च कृशोदरी चंद्रानना ।
मीननेत्रा केशभ्रमरमंडिता सर्वांगसुंदरी देवी धैर्यपुंजविनाशिनी कांचीगुणेन चित्रेण
वलयांगदनूपुरैः हारैर्मुक्तादिसंजातैः कंठाभरणैरपि मकुटेनापि चित्रेण कुंडलाद्यैः
सहस्रशः विराजिता स्वनोपम्यरूपा भूषणाभूषणा जननी सर्वजगतो ह्येषा वृषांचित
नी तथा सहितं पुरुषेण तु त्यजितं त्रिगुणाधिके ब्रह्मादीनामभेदनानासर्पभूषणभूषितं द्वीपि
चर्मावृतं तथा स्वतं अथवापि दिगंबरं भस्मोद्धूलितसर्वांगं ब्रह्मणमस्थिमालिनं तथैव चंद्र
खंडेन विराजितजटातटं गंगाधरं स्मेरमुखं गोक्षीरधवलोज्ज्वलं कंदर्पकोटिसदृशं सू
र्यकोटिसमप्रभं सृष्टिस्थित्यंतकारणं सृष्टिस्थित्यंतवर्जितं प्रणेंद्र वदनांभोज सूर्यसोमा

[illegible] वमासीदेवंकंबुग्रीवंशशिमनोहरं आजानुबाहुंपुनःषनागयज्ञोपवीतिनं पद्मासनं
समासीनंनासाग्रन्यस्तलोचनं वामदेवंमहादेवंगुरूणांप्रथमंगुरुं स्वयंज्योतिस्वरूपंतं
आनंदात्मानमद्वयं यतोहिरण्यगर्भोयंविराजोजनकःपुमान् जातःसमस्तदेवानाञ्च
न्येषांचनियामकः नीलकंठममदेवंविश्वेशंपापनाशनं हृदिपद्मेथवास्थैर्येवह्नौवाच
कमंडले कैलाशादिगिरौवापिचिंतयेद्योगमाश्रितः एवंचिंतयतस्तस्ययोगिनोमानसं
स्थिरे यदायातितदासर्वप्रपंचरहितंशिवं प्रपंचकारणंदेवंअवाङ्मनसगोचरं प्रया
तिस्वात्मनोयोगी पुरुषंदिव्यमद्भुतं मनसःस्वात्ममोहस्यपरंतेनविवर्जितं साक्षिणंसर्व
बुद्धीनांबुध्यादिपरिवर्जितं उमासहायोभगवान्सगुणःपरिकीर्तितः निर्गुणश्चसमरा
वाप्यनंततोन्योस्तिकश्चन ब्रह्माविष्णुस्तथारुद्रःशक्रोदेवसमन्वितः अग्निस्सूर्यस्तथा
चन्द्रःकालःसृष्ट्यादिकारणं एकादशेंद्रियाण्यंतःकरणंचचतुर्विधं प्राणपंचमहाभू
तंपंचकेनसमन्वितः दिशश्चप्रदिशस्तद्वतउपरिष्टादधोपिच स्वेदजादीनिभूतानिब्रह्मां
डंचविराड्वपुः विराड्हिरण्यगर्भश्चजीवईश्वरएवचमायातत्कार्यमखिलंवर्तते
महत्त्वंयच्चभूतंयच्चभव्यंतत्सर्वंसमहेश्वरः एकएवयथास्वप्नेपुमानननानावि

आ॰ पु॰ ३४॰ २ 340

धोभवेत् एकएवतथादेवबहुस्नानाविधस्थितः गंधर्वनगरेयद्वत्गगनेतद्विवर्जितः दृश्यते ।
लीयतेचद्दश्यतेप्यवतिष्ठते आनंदात्मनिनिर्भेदएवंभिन्नमिदंजडं अद्वितीयात्मविज्ञाना
नान्यःपंथाविमुक्तये विद्यतेनाप्यभूत्नैवभविष्यतिकदाचन सर्वभूतस्थमात्मानंसर्वभूता
निचात्मनि संपश्यन्ब्रह्मपरमंयातिनान्येनहेतुना एवंचेदयमात्मानंपुमानज्ञात्वमरणं कु
यात् अन्यनावाप्रकारेणविजानीयात्तुबुद्धिमान् अधिरारणिमात्मायंदेहंजीवितपद्दि
तः त्रिमात्रेप्रणवेतद्वदुत्तरारणिसंज्ञिते संध्यानेचमनोध्यानंनेत्रंकृत्वाविलोडयेत् एवं
विलोडनात्तस्य आनंदात्माभिधानलः संजातज्ञानरत्नोपिपिपाशान्कामादिनामकान् दे
हेतेषुप्रदग्धेषुस्वयमेकोवतिष्ठते पाशानदहतियोजीवःस्वात्मब्रह्म बोधतः नभिन्नो
ब्रह्मणस्तोयेकिंतुब्रह्मैवकेवलं निगूढमाययास्वस्यशयानःपुरुषोयथा जीवनेप्राप्यकर्मा
णिकुरुतेविविधानिहि कृत्वाचफलमात्मायंभुक्तेजीवःकृतःस्वयं स्वप्नेजागरणेदेहान्गृह्णा
त्नानाविधानपि त्यजंश्चविविधैर्भोगैर्यातिजन्मविवर्जितः सुषुप्तोमूर्छितोभूत्वाविहितेषणावि
वर्जितः आनंदस्वात्मनस्तावत्तंभुंजानोपिनवध्यते मंत्रौषधैर्यथाभ्रदो आत्मानंनैववेत्तिहि मा
ययैवंविमूढोयंवेत्तिकिंचित्त्ससंसृतेः निर्दोषोपियथाकश्चित्दोषवानिवसंगतः मायासंगात्

वप्रतीयते रूपमस्न्यय यथाकाशेरूपंवैत्तिविमोहतः मायास्त्येनयथाजीवेमायाभातीवमायया वि॰
यथामोहंस्वप्नेगच्छत्यमरुठधीः एवमात्मापिसंसारेमोहंगच्छत्यमोहतः शयानःपुरुषोऽङ्गःस्वे ज्ञानपि २
यावन्निद्रान्तयंव्रजेत् यथानथात्रजीवोपियावन्मायान्तयंव्रजेत् यथाप्रबोधयेत्कश्चित्शा॰
यानकरुणाहतः हृदंतवरुहिकादिभंचेतवरुद्धःखितं गुरुस्तथात्मपाविष्टः संसारस्व॰
मपीडितं नापत्रयथुतेकश्चित्बोधयेत्करुणाहतः प्रतिबुद्धोयथास्वात्मनरोऽङ्गःस्वंप्रपश्यति
जीवस्यप्रतिबोधोयोजायतेभाग्ययोगतः सावस्थाऽदुर्लभान्हणेचतुर्थीकस्यचिद्भवेत् स्थू॰
लेसूक्ष्मेतथाज्ञानेपुरत्रयमुदीरितं जीवस्यतत्तुरीयाख्यंनाशमेतिनचान्यथा सारंसारेचरा॰
क्लीनेस्थूलेदेहेसदेवसः कर्मानुसारतस्तद्वद्ग्राह्यग्राह्यजहातिसः जातोबालोयुवावृद्धो
मृतोजातःपुनस्तथा वंभ्रमीत्येषसंसारेघटीयंत्रसमोवशः उच्चावचानयंदेहान्आत्म
ज्ञानविवर्जितः प्राप्नोत्येवाननुभोगांस्तेनाशमेतिपुनःपुमान् तुरीयंप्राप्यतेरूपंयज्जीवेनात्म
नस्तदा आधारभूतेनिर्देशमानेदात्मास्वयंप्रभं सर्वस्यजगतोहेतुंकार्यकारणवर्जितं एत॰
स्मात्जायतेप्राणोमनःकर्मेंद्रियाणिच खवायुर्ज्योतिरापोवैभूमिर्विश्वस्यधारिणी एतस्मा

आ· पु· ३४८

341

तुरीयंगुरवरावमात्मतपासदा आदिशोनिमहात्मानुःशिष्यान्विगतकल्मषान् यन्मरेवस
सर्वात्माविश्वस्यायतनंमहत् सूक्ष्मात्सूक्ष्मतरंनित्यंतदेवत्वंत्वमेवतत् जाग्रत्स्वप्नसुषुप्त्या
द्यप्रपंचंयत्प्रकाशते तद्ब्रह्माहमितिज्ञात्वासर्वबंधैःप्रमुच्यते त्रिषुधामसुयद्भोग्यंभोक्ताभो
गश्चयोभवेत् तेभ्योविलक्षणःसाक्षीचिन्मात्रोहंसदाशिवः एवंसद्गुरुणादिष्टंआत्मानं
प्रतिपद्यते अणोरणुतमेतद्वत्महतोपिमहत्तरं मय्येवसकलंजातंमयिसर्वंप्रतिष्ठितं ।
मयिसर्वंलयंयातिविश्वमेतच्चरं सर्वभेदविनिर्मुक्तंतद्ब्रह्माद्वयमस्म्यहं विश्वरूपंपुराणव
पुरुषंतेजसांनिधिं इंद्रियैःसकलैःसर्वंज्ञानकर्मद्वयात्मकैः प्राणाबुध्यादिभिस्त्यक्तंभ
गवंतंमहेश्वरं सर्वज्ञंहेतुरहितंअवाङ्मनसगोचरं वेदैरनेकैःसंवेद्यंवेदान्तार्थप्रकाश
कं सर्वविद्यागुरुंदेवंप्रपंचेनविवर्जितं भूतभौतिकरूपायमाययासहितोपिच आनंदा
त्मनितिर्दिष्टेनेधास्तोखिलोपिच गंधर्वनगरंयद्वत्अध्वस्तंगगनेमले ततोनकोपिभेदोत्र
भूतोभवन्भाव्यपि एवंज्ञात्वापरंरूपंआनंदात्मानमद्वयं सर्वबुद्धिस्थितंसर्वबुद्धिसाक्षि
णमीश्वरं प्रयातिपुरुषःश्रेष्ठंनित्यंसदसतःपरं सगुणंब्रह्मचेतज्ज्ञात्वानिर्गुणंचअघा
क्रियाम पुरुषोनतदात्मासंज्ञयातस्मैश्रुद्धमानसः किंतन्नित्यजयेदेतेरुद्राध्यायमनिदिते

क्षेः चतुर्थाश्रममाव्रजेत् तत्रापिपावत्तेवस्यात्साक्षात्कारः परात्मनः रुद्राध्यायंजपंस्तावत्
उमानाथंविचिंतयेत् उमासहायंपरमेश्वरंप्रभुंचतुर्भुजंनीलकंठंप्रशांतं ध्यात्वामुनिर्गच्छ
तिभूतयोनिंसमस्तसाक्षिणंतमसःपरस्तात् यथाकालंहिवेदांतश्रवणादीनिसर्वदा कुर्वी
तचतुर्थेभक्त्याँ परमास्तिक्यमाश्रितः एवंहिकुर्वतोनित्यंयतेरत्रप्रबोधनं ब्रह्मोपनिषदाबु
द्धेर्जायतेयद्धिहरिणे श्वेतकेतवेहिसर्वंह्युक्तोयतीनांप्रथमोहिसः विज्ञानवान्परंतत्वंश्वात्मो
पनिषदायिहि तस्माद्दात्मेषविज्ञेयः परहंसेनसर्वदा अस्यमध्येयमाचारोजपेन्योन्यःश्रकी
र्तितः इतितेकथितंसर्वंपृष्टंयद्धित्वयाधुना परंहंसाश्रमंभूयः किमन्यत्श्रोतुमिच्छसि इ
तिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउ
पनिषद्रत्नआत्मपुराणगर्भोपनिषत्सारार्थप्रकाशोनामैकादशोध्यायः ॥११॥ रामायनमः
कथाविशारदमाः श्रुत्वाशिष्यः श्रद्धासमन्वितः श्वेतकेतोःकथांश्रोतुंपप्रच्छसगुरुंपुनः भ
गवन्भवताख्यातंहृतएतन्नयस्ययत् ज्ञानंकौषीतकेस्तद्वत्आदित्यस्यमहात्मनः सश्वेता
श्वतरस्यापिकठस्यापिचनितिरेः जाबालादिमुनीशानांयोगसंन्याससंयुतं आख्यानान्यति

आश्व॰
३४२
342

चित्राणिवहूनिविविधानिच श्रुतानितानिसर्वाणि मयानैवदनात्गुरो प्रज्ञानांमनयोयत्रकरु॰
नाक्रांतचेतसः ऊचुर्ब्रह्मात्मविज्ञानंवामदेवः चगर्भगः मीमांसाक्रांतचित्तानां उक्तवानधिकारिणां
करामलकवद्यत्रब्रह्मात्माज्ञायतेन्नृभिः देहादिजडसंघातात्सर्वदैवविलक्षणः श्रवणायत्र
वैराग्यंकामुकस्यापिजायते स्वदेहेन्यशरीरेचवि विकादवधारिते प्रतर्दनस्यागमनेदिवोदासे॰
महात्मनः योद्धुकामस्यवैस्वर्गेविजयश्चास्यधीमतः इंद्रतोपिवरश्चापि ईलेभाणाशरीरिभिः गा
र्ग्यस्यद्विजवर्यस्यसंवादोजानशत्रुणा अश्विभ्यांचतथामैत्रंउक्तं श्चित्रकथाश्रयः यत्प्रसंगात्तत्व
यावेशाख्यिपर्यायेसमीरितः स्त्रीपुंसयोरभिन्नोयैविभिन्नोपिचकत्रचित् दध्यङ्ङाथर्वणोयत्रशाक
स्यापुष्यकारस्कृत् शाकेणनिहतःसाधुरर्थैस्मोस्विजमारयोः कथाजल्पाभिधाप्रोक्तायाज्ञवल्क्या
स्यचद्विजेः वादोस्यापिचतेनैवभभजाजनकेनहि द्विवारंतस्यसंन्यासोमैत्रेय्यास्त्वोपदेशने॰
कारणोप्यपिमीमांसाविप्राणांन्यासिनांतथा नाचिकेतस्यआख्यानंवरैर्नानाविधैर्युतं यजुषां
कृत्स्नानावापिभक्षणात्छेदनादपि वरुणंपितरंतद्वत्भृगोश्चागमनंवहु गंधर्वस्यापिवेनस्यस्या
त्मनोनुभवेरणं समाधिसाधनैस्त्वेनतत्साधनंन्याससंज्ञिते उक्तंपरममैत्रेतत्तत्त्व्याब्रह्मात्मरूपया
